| 1 | प्रशान् 8.2.64 | प्रशामौ | प्रशामः |
| S | same as above | same as above | same as above |
| 2 | प्रशामम् | same as above | same as above |
| 3 | प्रशामा | प्रशान्भ्याम् 8.2.64 | प्रशान्भिः 8.2.64 |
| 4 | प्रशामे | same as above | प्रशान्भ्यः 8.2.64 |
| 5 | प्रशामः | same as above | same as above |
| 6 | same as above | प्रशामोः | प्रशामाम् |
| 7 | प्रशामि | same as above | प्रशान्त्सु/प्रशान्सु 8.2.64, 8.3.30 |

**<u>म-कारान्त-पुँल्लिङ्गः (2) किम्</u>**

## [विधिसूत्रम्] 7.2.103 किमः कः । ~ विभक्तौ

When विभक्ति follows, किम् is replaced by क.




किमः $^{6/1}$ कः $^{1/1}$ । ~ विभक्तौ $^{7/1}$

2 words in the सूत्र; 1 word as अनुवृत्ति

- किमः 6/1 – प्रातिपदिक is किम्, one of the सर्वादिगण; in स्थानेयोगा षष्ठी.
- कः 1/1 – This is आदेश. This is अनेकाल्, consisting क् and अ.
- विभक्तौ 7/1 – From 7.2.84 अष्टन आ विभक्तौ।; in परसप्तमी. विभक्ति is संज्ञा defined as 1.4.104 विभक्तिश्च । ~ सुपः तिङः

[LSK] किमः $^{6/1}$ कः $^{1/1}$ स्यात् $^{III/1}$ विभक्तौ $^{7/1}$।

क is the substitute in the place of किम् when विभक्ति follows.

[LSK] कः $^{1/1}$ ।

किम् + सुँ

क + सुँ 7.2.103 किमः कः । ~ विभक्तौ

कः 8.2.66, 8.3.15

Note that after विप्रतिषेध with 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः, being पर, 7.2.103 किमः कः । ~ विभक्तौ takes place.

[LSK] कौ $^{1/2}$ । के $^{1/3}$ । शेषम् $^{1/1}$ सर्ववत् $^{0}$ ॥

Because of 7.2.103 किमः कः । ~ विभक्तौ, the प्रातिपदिक becomes अ-ending सर्वनाम. Thus it declines exactly like सर्व.

## Declension of किम् (म-पुं-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | कः | कौ | के |
| S | | | |
| 2 | कम् | same as above | कान् |
| 3 | केन | काभ्याम् | कैः |
| 4 | कस्मै | same as above | केभ्यः |
| 5 | कस्मात् | same as above | same as above |
| 6 | कस्य | कयोः | केषाम् |
| 7 | कस्मिन् | same as above | केषु |

**<u>म-कारान्त-पुँल्लिङ्गः (3) इदम्</u>**

## [विधिसूत्रम्] 7.2.108 इदमो मः । ~ सौ

When सुँ follows, the last letter (म्) of इदम् is replaced by म्.




इदमः 6/1 मः 1/1 । ~ सौ 7/1

2 words in the सूत्र; 1 word as अनुवृत्ति

- इदमः 6/1 – प्रातिपदिक is इदम्, one of the सर्वादिगण; in स्थानेयोगा षष्ठी.
- मः 1/1 – This is आदेश. The अ after म् is उच्चारणार्थ.
- सौ 7/1 – From 7.2.106 तदोः सः सावनन्त्ययोः ।; in परसप्तमी.

[LSK] सौ 7/1।

म् is the substitute in the place of the last letter of इदम् when सुँ follows.

[LSK] त्यदादि-अत्व-अपवादः 1/1 ॥

This is अपवाद for अ-आदेश of 7.2.102 त्यदादीनामः ।.

इदम् + सुँ

इदम् + सुँ 7.2.108 इदमो मः । ~ सौ

To be continued with the next sūtra –

## [विधिसूत्रम्] 7.2.111 इदोऽय् पुंसि । ~ सौ

When सुँ follows, इद् of इदम् in masculine is replaced by अय्.




इदः $^{6/1}$ अय् $^{1/1}$ पुंसि $^{7/1}$। ~ इदमः $^{6/1}$ सौ $^{7/1}$

3 words in the सूत्र; 2 words as अनुवृत्ति

- इदः 6/1 – प्रातिपदिक is इद्; in स्थानेयोगा षष्ठी.
- अय् 1/1 – This is आदेश. Being अनेकाल्, it replaces all the letters by 1.1.55 अनेकाल्शित्सर्वस्य।.
- पुंसि 7/1 – प्रातिपदिक is पुंस्, masculine; in विषयसप्तमी.
- इदमः 6/1 – From 7.2.108 इदमो मः।; in सम्बन्धे षष्ठी to इदः.
- सौ 7/1 – From 7.2.110 यः सौ।; in परसप्तमी.

[LSK] इदमः $^{6/1}$ इदः $^{6/1}$ अय् $^{1/1}$ सौ $^{7/1}$ पुंसि $^{7/1}$।

अय् is the substitute in the place of इद् of इदम् in masculine when सुँ follows.

[LSK] अयम् $^{1/1}$ ।

इदम् + सुँ

इदम् + सुँ      7.2.108 इदमो मः । ~ सौ

अय् अम् + सुँ      7.2.112 इदोऽय् पुंसि । ~ सौ

अय् अम्      6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

अयम्

Note that this is अपवाद for

इदम् + औ

इद अ + औ      7.2.102 त्यदादीनामः । ~ विभक्तौ

Continue to the next sūtra.

## [विधिसूत्रम्] 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

When short अ, which is not at the end of पद, is followed by गुण (अ, ए, ओ), they are replaced by पररूप (गुण)




अतः $^{5/1}$ गुणे $^{7/1}$ । ~ अपदान्तात् $^{5/1}$ पररूपम् $^{1/1}$ एकः $^{1/1}$ पूर्वपरयोः $^{6/2}$ संहितायाम् $^{7/1}$

2 words in the सूत्र; 5 words as अनुवृत्ति

- अतः 5/1 – Short अ; in पूर्वपञ्चमी.
- गुणे 7/1 – गुण s संज्ञा for अ, ए, ओ by 1.1.2 अदेङ् गुणः।; in परसप्तमी.
- अपदान्तात् 5/1 – From 6.1.96 उस्यपदान्तात् ।; adjective to अतः, "short अ, not at the end of पद".
- पररूपम् 1/1 – This is आदेश. From 6.1.94 एङि पररूपम् ।. परस्य रूपं पररूपम् (6T)।.
- एकः 1/1 – From अधिकारसूत्र 6.1.84 एकः पूर्वपरयोः।. Two letters become one.
- पूर्वपरयोः 6/2 – From अधिकारसूत्र 6.1.84 एकः पूर्वपरयोः।; in स्थानेयोगा षष्ठी.
- संहितायाम् 7/1 – In विषयसप्तमी.

[LSK] अपदान्तात् $^{5/1}$ अतः $^{5/1}$ गुणे $^{7/1}$ पररूपम् $^{1/1}$ एकादेशः $^{1/1}$ ॥

पररूप is the one substitute for short अ, not at the end of पद, and गुण.

## [विधिसूत्रम्] 7.2.109 दश्च । ~ विभक्तौ इदमः मः

When विभक्ति follows, द् of इदम् is replaced by म्.




दः [6/1] च [0] । ~ विभक्तौ [7/1] इदमः [6/1] मः [1/1]

2 words in the सूत्र; 1 word as अनुवृत्ति

- दः 6/1 – In स्थानेयोगा षष्ठी.
- च 0 – This is to connect to the previous sūtra, 7.2.108 इदमो मः।.
- इदमः 6/1 – From 7.2.108 इदमो मः।; in स्थानेयोगा षष्ठी.
- मः 1/1 – From 7.2.108 इदमो मः।; This is आदेश. The अ after म् is उच्चारणार्थ.
- विभक्तौ 7/1 – From 7.2.84 अष्टन आ विभक्तौ।; in परसप्तमी.

[LSK] इदमः [6/1] दस्य [6/1] मः [1/1] स्यात् [III/1] विभक्तौ [7/1]।

म् is the substitute in the place of द् of इदम् when विभक्ति follows.

[LSK] इमौ [1/2] ।

| | |
|---|---|
| इदम् + औ | |
| इद अ + औ | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| इद + औ | 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम् |
| इम + औ | 7.2.109 दश्च । ~ विभक्तौ इदमः मः |
| इमौ | 6.1.88 वृद्धिरेचि ।, after negating 6.1.102 प्रथमयोः पूर्वसवर्णः। by 6.1.104 नादिचि।. |

[LSK] इमे [1/3] ।

| | |
|---|---|
| इदम् + जस् | |
| इदम् + शी | 7.1.17 जसः शी । ~ सर्वनाम्नः अतः |
| इद अ + ई | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| इद + ई | 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम् |
| इम + ई | 7.2.109 दश्च । ~ विभक्तौ इदमः मः |
| इमे | 6.1.87 आद्गुणः ।, after negating 6.1.102 प्रथमयोः पूर्वसवर्णः। by 6.1.104 नादिचि।. |

[LSK] त्यदादेः $^{6/1}$ सम्बोधनम् $^{1/1}$ न $^{0}$ अस्ति $^{III/1}$ इति $^{0}$ उत्सर्गः $^{1/1}$ ॥

Generally, there is no सम्बोधन for प्रातिपदिकs in त्यदादि-गण. (There can be exceptions.)

## [विधिसूत्रम्] 7.2.112 अनाप्यकः । ~ विभक्तौ इदमः इदः

इद् of इदम् without क् is replaced by अन् when विभक्ति starting from 3rd case follows.




अन् $^{1/1}$ आपि $^{7/1}$ अकः $^{6/1}$। ~ इदमः $^{6/1}$ इदः $^{6/1}$ विभक्तौ $^{7/1}$

3 words in the सूत्र; 3 words as अनुवृत्ति

- अन् 1/1 – This is आदेश. This is अनेकाल्.
- आपि 7/1 – This is प्रत्याहार made of आ of टा and इत् letter of सुप्; in परसप्तमी.
- अकः 6/1 – अविद्यमानः ककारः यस्मिन् इति अकः (N17B)। that in which there is no क् of अकच् प्रत्यय. This is adjective to इदमः.
- इदमः 6/1 – From 7.2.108 इदमो मः।; in सम्बन्धे षष्ठी to इदः.
- इदः 6/1 – From 7.2.111 इदोऽय् पुंसि।; in स्थानेयोगा षष्ठी.
- विभक्तौ 7/1 – From 7.2.84 अष्टन आ विभक्तौ।; in परसप्तमी.

[LSK] अककारस्य $^{6/1}$ इदमः $^{6/1}$ इदः $^{6/1}$ अन् $^{1/1}$ आपि $^{7/1}$ विभक्तौ $^{7/1}$ ।

अन् is the substitute in the place of इद् of इदम् when आप् (from टा to सुप्) विभक्ति follows.

[LSK] "आप्" इति $^{0}$ प्रत्याहारः $^{1/1}$ ।

आप् is प्रत्याहार. The आदि letter is आ of टा, and अन्त्य इत् is प् of सुप्.

[LSK] अनेन $^{3/1}$ ॥

| | |
|---|---|
| इद अ + टा | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| इद + आ | 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम् |
| अन् अ + आ | 7.2.112 अनाप्यकः । ~ विभक्तौ इदमः इदः, with 1.1.55 अनेकाल्शित्सर्वस्य। |
| अन् अ + इन | 7.1.12 टाङसिँङसामिनात्स्याः । ~ अतः अङ्गात् |
| अनेन | 6.1.87 आद्गुणः । ~ अचि एकः पूर्वपरयोः संहितायाम् |

## [विधिसूत्रम्] 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

इद् of इदम् without क is elided when हलादि-विभक्ति starting from 3rd case follows.




हलि 7/1 लोपः 1/1 । ~ अकः 6/1 इदमः 6/1 इदः 6/1 आपि 7/1 विभक्तौ 7/1

2 words in the सूत्र; 5 words as अनुवृत्ति

- हलि 7/1 – This is adjective to विभक्तौ, and also अल्ग्रहण, thus with तदादिविधि, it results in "हलादौ विभक्तौ".
- लोपः 1/1 – This is आदेश.
- अकः 6/1 – From 7.2.112 अनाप्यकः।. This is adjective to इदमः.
- आपि 7/1 – This does not need to be अनुवृत्ति, because of हल्, and वचनसामर्थ्य for 7.2.111.
- इदमः 6/1 – From 7.2.108 इदमो मः।; in सम्बन्धे षष्ठी to इदः.
- इदः 6/1 – From 7.2.111 इदोऽय् पुंसि।; in स्थानेयोगा षष्ठी.
- विभक्तौ 7/1 – From 7.2.84 अष्टन आ विभक्तौ।; in परसप्तमी.

[LSK] अककारस्य 6/1 इदमः 6/1 इदः 6/1 लोपः 1/1 आपि 7/1 हलादौ 7/1 ।

लोप is the substitute in the place of इद् of अककार इदम् when हलादि आप् (from टा to सुप्) विभक्ति follows.

[LSK] (परिभाषा) न 0 अनर्थके 7/1 अलोऽन्त्य-विधिः 1/1 अनभ्यास-विकारे 7/1 ॥

परिभाषा tells "in a group of letters which is not meaningful, 1.1.52 अलोऽन्त्यस्य। does not work, except for modifications in अभ्यास". Thus all the letters of "इद्" are to be elided.

इदम् + भ्याम्

इद अ + भ्याम्   7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + भ्याम्   6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अ + भ्याम्   7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

Here, is 7.3.102 सुपि च। applicable? The condition for this sūtra is अदन्त-अङ्गस्य. The अङ्ग here consists of only one letter, अ. Is this considered to be अदन्त-अङ्गस्य? The next sūtra says.

## [परिभाषा-सूत्रम्] 1.1.21 आद्यन्तवदेकस्मिन् ।

An effect can take place on a single letterlikeonan आदि orअन्त letter.

आदि-अन्तवत्$^{0}$ एकस्मिन्$^{7/1}$ ।

2 words in the सूत्र; no अनुवृत्ति is required.

- आदि-अन्तवत् 0 – आदिः च अन्तः च आद्यन्तौ (ID)। तयोः इव आद्यन्तवत् by 5.1.116 तत्र तस्य इव ।.
- एकस्मिन् 7/1 – Here, this means "in a single letter".

[LSK] एकस्मिन्$^{7/1}$ क्रियमाणम्$^{1/1}$ कार्यम्$^{1/1}$ आदौ$^{7/1}$ इव$^{0}$ अन्ते$^{7/1}$ इव$^{0}$ स्यात्$^{III/1}$ ।

An operation performed on a single letter should be like it is upon an initial or final letter.

This is based on sentences found in महाभाष्य :

यस्मात्$^{5/1}$ पूर्वम्$^{1/1}$ न$^{0}$ अस्ति$^{III/1}$ परम्$^{1/1}$ अस्ति$^{III/1}$ सः$^{1/1}$ आदिः$^{1/1}$ इति$^{0}$ उच्यते$^{III/1}$ ।

That which does not have letter before, and has letter after, is called आदि.

यस्मात्$^{5/1}$ पूर्वम्$^{1/1}$ अस्ति$^{III/1}$ परम्$^{1/1}$ च$^{0}$ न$^{0}$ अस्ति$^{III/1}$ सः$^{1/1}$ अन्तः$^{1/1}$ इति$^{0}$ उच्यते$^{III/1}$।

That which has letter before, and does not have letter after, is called अन्त.

According to these sentences, the single letter अ in the अङ्ग under discussion is not considered to be अन्त, which is required for application of 7.3.102 सुपि च।, whose requirement is अ-ending अङ्ग. This is where this परिभाषा is useful.

[LSK] "सुपि च" (7.3.102) इति$^{0}$ दीर्घः$^{1/1}$ । आभ्याम्$^{3/2}$ ॥

The दीर्घ of 7.3.102 सुपि च। takes place on the single letter अ in the अङ्ग, just like on the last letter of an अङ्ग by the help of this परिभाषा 1.1.21 आद्यन्तवदेकस्मिन् ।.

इदम् + भ्याम्

इद अ + भ्याम् 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + भ्याम् 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अ + भ्याम् 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

आ + भ्याम् 7.3.102 सुपि च। ~ दीर्घः अतः अङ्गस्य with परिभाषा 1.1.21 आद्यन्तवदेकस्मिन् ।

आभ्याम्

## [निषेधसूत्रम्] 7.1.11 नेदमदसोरकोः । ~ भिसः अङ्गात्

For इदम् and अदस् without क, ऐस् does not take the place of भिस्.




न $^{0}$ इदम्-अदसोः $^{6/2}$ अकोः $^{6/2}$ । ~ भिसः $^{6/1}$ ऐस् $^{1/1}$

3 words in the सूत्र; 2 words as अनुवृत्ति

- न 0 – This is to negate ऐस्-आदेश for भिस्.
- इदम्-अदसोः 6/2 – प्रातिपदिक इदम् and अदस् in इतरेतरद्वन्द्वसमास; in सम्बन्धे षष्ठी to भिसः.
- अकोः 6/2 – अविद्यमानः ककारः यस्मिन् इति अकः (N17B)। that in which there is no क् of अकच् प्रत्यय. This is adjective to इदम्-अदसोः.
- भिसः 6/1 – From 7.1.9 अतो भिस ऐस्।; in स्थानेयोगा षष्ठी.
- ऐस् 1/1 – From 7.1.9 अतो भिस ऐस्।; this is आदेश to be negated by this sūtra.

[LSK] अककारयोः $^{6/2}$ इदम्-अदसोः $^{6/2}$ भिसः $^{6/1}$ ऐस् $^{1/1}$ न $^{0}$।

ऐस् substitute does not take place for भिस् for इदस् and अदस् without क् of अकच्.

[LSK] एभिः $^{3/3}$ ।

इदम् + भिस्

इद् अ + भिस् 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + भिस् 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अ + भिस् 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

ए + भिस् 7.3.103 बहुवचने झल्येत् । ~ अतः सुपि

एभिः 8.2.66, 8.3.15

[LSK] अस्मै [4/1] ।

इदम् + ङे

इद अ + ङे 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + ङे 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

Here, 7.1.14 सर्वनाम्नः स्मै। ~ अतः ङेः and 7.2.112 अनाप्यकः । ~ विभक्तौ इदमः इदः are in विप्रतिषेध.




However, परं कार्यम् is not desired in this case. According to परिभाषा "पूर्वपर-नित्य-अन्तरङ्ग-अपवादानाम् उत्तोरोत्तरं बलीयः", 7.1.14 सर्वनाम्नः स्मै। is to be applied because स्मै is नित्य.

परिभाषा "पूर्वपर-नित्य-अन्तरङ्ग-अपवादानाम् उत्तोरोत्तरं बलीयः" says: between two sūtras, अपवाद (exception) takes precedence over उत्सर्ग (general). If अपवाद-उत्सर्ग relationship is not there, अन्तरङ्ग (intimate) takes precedence over बहिरङ्ग (external). If such relationship is not there, then नित्य (always applicable) takes precedence over अनित्य (not always applicable). Finally, even when there is no such relationship, पर takes precedence over पूर्व.

1. अपवाद over उत्सर्ग
2. अन्तरङ्ग over बहिरङ्ग
3. नित्य over अनित्य
4. पर over पूर्व

Between 7.1.14 सर्वनाम्नः स्मै। and 7.2.112 अनाप्यकः।, 7.1.14 सर्वनाम्नः स्मै। is applicable even after applying 7.2.112 अनाप्यकः।, while this is not the case for 7.2.112 अनाप्यकः।. Thus स्मै is नित्य.

इदम् + स्मै 7.1.14 सर्वनाम्नः स्मै। ~ अतः ङेः

इद अ + स्मै 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + स्मै 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अ + स्मै 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

अस्मै

[LSK] एभ्यः 4/3 ।

इदम् + भ्यस्

इद अ + भ्यस्    7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + भ्यस्    6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अ + भ्यस्    7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

ए + भ्यस्    7.3.103 बहुवचने झल्येत् । ~ अतः सुपि

एभ्यः    8.2.66, 8.3.15

[LSK] अस्मात् 5/1 ।

इदम् + ङसिँ

इद अ + अस्    7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + अस्    6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

इद + स्मात्    7.1.15 ङसिङ्योः स्मात्स्मिनौ । ~ अतः सर्वनाम्नः, by negating 7.2.112 अनाप्यकः। by नित्य.

अ + स्मात्    7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

अस्मात्

[LSK] अस्य 6/1 ।

इदम् + ङस्

इद अ + अस्    7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + अस्    6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

इद + स्य    7.1.12 टाङसिँङसामिनात्याः । ~ अतः अङ्गात्

अ + स्य    7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

अस्य

[LSK] अनयोः 6/2 ।

इदम् + ओस्

इद अ + ओस्    7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + ओस्    6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अन + ओस्    7.2.112 अनाप्यकः। ~ इदमः इदः विभक्तौ

अने + ओस्    7.3.104 ओसि च । ~ एत् अतः अङ्गस्य

अनय् + ओस्    6.1.78 एचोऽयवायावः। ~ अचि

अनयोः    8.2.66, 8.3.15

[LSK] एषाम्[6/3] ।

इदम् + आम्

इद अ + आम् 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + आम् 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

इद + स् आम् 7.1.52 आमि सर्वनाम्नः सुट् । ~ अङ्गात् आत्

अ + साम् 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

ए + साम् 7.3.103 बहुवचने झल्येत् । ~ अतः सुपि

ए + षाम् 8.3.59 आदेश-प्रत्यययोः । ~ इण्कोः सः मूर्धन्यः

[LSK] अस्मिन्[7/1] । अनयोः[7/2]।

इदम् + ङि

इद अ + ङि 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + ङि 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

इद + स्मिन् 7.1.15 ङसिङ्योः स्मात्स्मिनौ । ~ अतः सर्वनाम्नः, by negating 7.2.112 अनाप्यकः। by नित्य.

अ + स्मिन् 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

अस्मिन्

[LSK] एषु[7/3]॥

इदम् + सुप्

इद अ + सु 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + सु 6.1.97 अतो गुणे । ~ अपदान्तात् पररूपम् एकः पूर्वपरयोः संहितायाम्

अ + सु 7.2.113 हलि लोपः । ~ अकः इदमः इदः आपि विभक्तौ

ए + सु 7.3.103 बहुवचने झल्येत् । ~ अतः सुपि

ए + षु 8.3.59 आदेश-प्रत्यययोः । ~ इण्कोः सः मूर्धन्यः

## Declension of इदम् (म-पुं-3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | इदम् + सुँ<br>इदम् + स् 7.2.108<br>अय् अम् + स् 7.2.111<br>**अयम्** 6.1.68 | इदम् + औ<br>इद + औ 7.2.102, 6.1.97<br>इम + औ 7.2.109<br>**इमौ** 6.1.88 | इदम् + जस्<br>इदम् + शी 7.1.17<br>इद + ई 7.2.102, 6.1.97<br>इम + ई 7.2.109<br>**इमे** 6.1.87 |
| S | | | |
| 2 | इद + अम् 7.2.102, 6.1.97<br>इम + अम् 7.2.109<br>**इमम्** 6.1.107 | same as above | इद + शस् 7.2.102, 6.1.97<br>इम + अस् 7.2.109<br>**इमान्** 6.1.102, 6.1.103 |
| 3 | इदम् + टा<br>इद + टा 7.2.102, 6.1.97<br>इद + इन 7.1.12<br>अन + इन 7.2.112<br>**अनेन** 6.1.87 | इदम् + भ्याम्<br>इद + भ्याम् 7.2.102, 6.1.97<br>अ + भ्याम् 7.2.113<br>**आभ्याम्** 7.3.102, 1.1.21 | इदम् + भिस्<br>इद + भिस् 7.2.102, 6.1.97<br>अ + भिस् 7.1.11, 7.2.113<br>**एभिः** 7.3.103, 8.2.66, 8.3.15 |
| 4 | इदम् + ङे<br>इद + ङे 7.2.102, 6.1.97<br>इद + स्मै 7.1.14<br>**अस्मै** 7.2.113 | same as above | इदम् + भ्यस्<br>इद + भ्यस् 7.2.102, 6.1.97<br>अ + भ्यस् 7.2.113<br>**एभिः** 7.3.103, 8.2.66, 8.3.15 |
| 5 | इदम् + ङसिँ<br>इद + ङसिँ 7.2.102, 6.1.97<br>इद + स्मात् 7.1.15<br>**अस्मात्** 7.2.113 | same as above | same as above |
| 6 | इदम् + ङस्<br>इद + ङस् 7.2.102, 6.1.97<br>इद + स्य 7.1.12<br>**अस्य** 7.2.113 | इदम् + ओस्<br>इद + ओस् 7.2.102, 6.1.97<br>अन + ओस् 7.2.112<br>अने + ओस् 7.3.104<br>**अनयोः** 6.1.78, 8.2.66, 8.3.15 | इदम् + आम्<br>इद + आम् 7.2.102, 6.1.97<br>इद + साम् 7.1.52<br>अ + साम् 7.2.113<br>ए + साम् 7.1.52<br>**एषाम्** 8.3.59 |
| 7 | इदम् + ङि<br>इद + ङि 7.2.102, 6.1.97<br>इद + स्मिन् 7.1.15<br>**अस्मिन्** 7.2.113 | same as above | इदम् + सुप्<br>इद + सु 7.2.102, 6.1.97<br>अ + सु 7.2.113<br>ए + सु 7.1.52<br>**एषु** 8.3.59 |

## [विधिसूत्रम्] 2.4.34 द्वितीयाटौस्स्वेनः । ~ इदमः एतदः अन्वादेशे

इदम् and एतद् are replaced by एन in अन्वादेश, mentioning for the second time, when द्वितीया (अम्, औट्, शस्), टा and ओस् follow.




द्वितीया-टा-ओस्सु $^{7/3}$ एनः $^{1/1}$ । ~ इदमः $^{6/1}$ एतदः $^{6/1}$ अन्वादेशे $^{7/1}$

2 words in the सूत्र; 3 words as अनुवृत्ति

- द्वितीया-टा-ओस्सु 7/3 – द्वितीया च टा च ओस् च द्वितीयाटौसः (ID), तेषु।; in परसप्तमी.
- एनः 1/1 – This is आदेश. Being अनेकाल्, 1.1.55 अनेकाल्शित्सर्वस्य। will be applied.
- इदमः 6/1 – प्रातिपदिक is इदम्; from 2.4.32 इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ।; in स्थानेयोगा षष्ठी.
- एतदः 6/1 – प्रातिपदिक is एतद्; from 2.4.33 एतदस्त्र-तसोस्त्र–तसौ चानुदात्तौ।; in स्थानेयोगा षष्ठी.
- अन्वादेशे 7/1 – From 2.4.32 इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ।; in विषयसप्तमी.

[LSK] इदमेतदोः $^{6/2}$ अन्वादेशे $^{7/1}$ ।

एन is the substitute for इदम्/एतद् in अन्वादेश, when द्वितीया (अम्, औट्, शस्), टा and ओस् follow.

[LSK] किञ्चित् $^{0}$ कार्यम् $^{2/1}$ विधातुम् $^{0}$ उपात्तस्य $^{6/1}$ कार्यान्तरम् $^{2/1}$ विधातुम् $^{0}$ पुनः $^{0}$ उपादानम् $^{1/1}$ अन्वादेशः $^{1/1}$।

अन्वादेश is mentioning again to reveal other information after mentioning the same thing to reveal one thing.

[LSK] यथा $^{0}$ – अनेन $^{3/1}$ व्याकरणम् $^{1/1}$ अधीतम् $^{1/1}$ एनम् $^{2/1}$ छन्दः $^{2/1}$ अध्यापय $^{II/1}$ इति $^{0}$ ।

For example – "By this (boy) grammar has been studied. To this (boy), please teach prosody".

[LSK] अनयोः $^{6/2}$ पवित्रम् $^{1/1}$ कुलम् $^{1/1}$ अनयोः $^{6/2}$ प्रभूतम् $^{1/1}$ स्वम् $^{1/1}$ इति $^{0}$ ॥

These two people maintain a good family. There is also abundance of wealth for them.

[LSK] एनम्$^{2/1}$ ।

इदम् + अम्

एन + अम् 2.4.34 द्वितीयाटौस्स्वेनः । ~ इदमः एतदः अन्वादेशे

एनम् 6.1.107 अमि पूर्वः। ~ अकः पूर्वपरयोः एकः संहितायाम्

Declension of इदम् in अन्वादेश (म्-पुं-3-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | अयम् | इमौ | इमे |
| S | | | |
| 2 | एनम् 2.4.34 | एनौ 2.4.34 | एनान् 2.4.34 |
| 3 | एनेन 2.4.34 | आभ्याम् | एभिः |
| 4 | अस्मै | same as above | एभ्यः |
| 5 | अस्मात् | same as above | same as above |
| 6 | अस्य | एनयोः 2.4.34 | एषाम् |
| 7 | अस्मिन् | same as above | एषु |

Note that the forms in अन्वादेश are not optional.

In many textbooks these forms are presented in one declensional chart, combined with non-अन्वादेश forms, which can give the impression that they are optional forms. One should not get confused by such misleading presentation.

It is better to make two separate charts: one for the original forms, and the other for the forms in अन्वादेश.

## न-कारान्त-पुँल्लिङ्गः (1) राजन्

राजते शोभते इति राजा । The one who shines is राजन्, king.

राजृँ दीप्तौ (1U) to shine + कनिँन् by (उ० 1.156) कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः।

राज् + अन्	अनुबन्धलोपे

राजन्	प्रातिपदिकसंज्ञा by 1.2.46 कृत्तद्धितसमासाश्च ।

[LSK] राजा $^{1/1}$॥

राजन् + सुँ

राजन्	6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

राजान्	6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः

राजा	8.2.7 नलोपः प्रातिपदिकान्तस्य । ~ पदस्य

राजन् + सुँ $^{S/1}$

राजन्	6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

The सुँ being सम्बुद्धि by 2.3.49 एकवचनं संबुद्धिः।, 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । does not apply. As for 8.2.7 नलोपः प्रातिपदिकान्तस्य।, the next sūtra gives निषेध, prohibition.

## [निषेधसूत्रम्] 8.2.8 न ङिसम्बुद्ध्योः । ~ न लोपः प्रातिपदिकान्तस्य

The elision of न् is prohibited when ङि or सम्बुद्धि follows.




न $^{0}$ ङि-सम्बुद्ध्योः $^{7/2}$। ~ न $^{6/1}$ लोपः $^{1/1}$

2 words in the सूत्र; 3 words as अनुवृत्ति

- न 0 – Negation for नकारलोप taught in 8.2.7 नलोपः प्रातिपदिकान्तस्य।.
- ङि-सम्बुद्ध्योः 7/2 – ङिः च सम्बुद्धिः च ङिसम्बुद्धी (ID), तयोः।; in परसप्तमी.
- न 6/1 – From 8.2.7 नलोपः प्रातिपदिकान्तस्य।; लुप्तषष्ठी-एकवचनम्; it should be understood as "नः" or "नकारस्य"; in स्थानेयोगा षष्ठी. Other conditions such as पदस्य are understood by the context.
- लोपः 1/1 – This is आदेश from 8.2.7 नलोपः प्रातिपदिकान्तस्य।.
- प्रातिपदिकान्तस्य 6/1 – From 8.2.7 नलोपः प्रातिपदिकान्तस्य।.

[LSK] नस्य $^{6/1}$ लोपः $^{1/1}$ न $^{0}$ ङौ $^{7/1}$ सम्बुद्धौ $^{7/1}$ च $^{0}$ ।

There is no elision of न् by 8.2.7 when ङि or सम्बुद्धि follows.

[LSK] हे $^{0}$ राजन् $^{S/1}$।

राजन् + सुँ $^{S/1}$

राजन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

The सुँ being सम्बुद्धि by 2.3.49 एकवचनं संबुद्धिः।, 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । does not apply. And 8.2.7 नलोपः प्रातिपदिकान्तस्य। is debarred by 8.2.8 न ङिसम्बुद्ध्योः । ~ न लोपः.

# (वार्तिकम्) ङावुत्तरपदे प्रतिषेधो वक्तव्यः ।

The prohibition of न्-लोप does not apply when ङि is followed by उत्तरपद in समास.




ङौ 7/1 उत्तरपदे 7/1 प्रतिषेधः 1/1 वक्तव्यः 1/1।

4 words in the वार्तिक, other words are understood by the context.

- ङौ 7/1 – प्रातिपदिक ङि in परसप्तमी.
- उत्तरपदे 7/1 – The second word in समास; in परसप्तमी.
- प्रतिषेधः 1/1 – प्रति + सिध् to prohibit + घञ्, prohibition.
- वक्तव्यः 1/1 – वच् + तव्य, that which should have been said.

[LSK] ब्रह्मनिष्ठः 1/1 ।

ब्रह्मणि 7/1 निष्ठा 1/1 यस्य 6/1 सः 1/1 ब्रह्मनिष्ठः 1/1 (116B) । One whose commitment is Brahman

| | |
|---|---|
| ब्रह्मन् + ङि + निष्ठा + सुँ | 2.2.24 अनेकमन्यपदार्थे । ~ समासः बहुव्रीहिः |
| प्रातिपदिकसंज्ञा | 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम् |
| ब्रह्मन् + निष्ठा | 2.4.71 सुपो धातुप्रातिपदिकयोः। ~ लुक् |
| ब्रह्म + निष्ठा | 8.2.7 नलोपः प्रातिपदिकान्तस्य।, after negating 8.2.8 न ङिसम्बुद्ध्योः । by (वा०) ङावुत्तरपदे प्रतिषेधो वक्तव्यः । |
| ब्रह्मनिष्ठ | 1.2.48 गोस्त्रियोरुपसर्जनस्य । ~ ह्रस्वः |

[LSK] राजानौ 1/2, 2/2 । राजानः 1/3 ।

| | |
|---|---|
| राजन् + औ | |
| राजान् + औ | 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः |

[LSK] राज्ञः 2/3 ॥

| | |
|---|---|
| राजन् + शस् | |
| भ-संज्ञा | 1.4.18 यचि भम् । ~ स्वादिषु असर्वनामस्थाने |
| राज् न् + अस् | 6.4.134 अल्लोपोऽनः। ~ भस्य अङ्गस्य |
| राज् ञ् + अस् | 8.4.40 स्तोः श्चुना श्चुः । |

## [नियमसूत्रम्] 8.2.2 नलोपः सुँप्स्वरसंज्ञातुग्विधिषु कृति । ~ असिद्धः

असिद्धत्व of नलोप is only when these four things follow, 1. सुप्-विधि, 2. स्वर-विधि, 3. संज्ञाविधि, 4. तुक्-विधि with following कृत्प्रयय.

नलोपः $^{1/1}$ सुँप्-स्वर-संज्ञा-तुक्-विधिषु $^{7/3}$ कृति $^{7/1}$ । ~ असिद्धः $^{1/1}$

3 words in the सूत्र; 1 word as अनुवृत्ति

- नलोपः 1/1 – नस्य लोपः नलोपः (6T)।, the elision of न् by 8.2.7 नलोपः प्रातिपदिकान्तस्य।.
- सुँप्-स्वर-संज्ञा-तुक्-विधिषु 7/3 – सुँप् च स्वरः च संज्ञा च तुक् च सुँप्-स्वर-संज्ञा-तुकः (ID), तेषां विधयः सुँप्-स्वर-संज्ञा-तुक्-विधयः (6T), तेषु।; in विषयसप्तमी.
  The four members of इतरेतरद्वन्द्वसमास are connected to विधि in शेषे षष्ठी, by कर्म-अविवक्षितत्वात्.
- कृति 7/1 – This word is connected only to तुक्-विधि; in परसप्तमी.
- असिद्धः 1/1 – That which does not exist. Since असिद्ध is already said, and again said with restricted condition, this sūtra is understood to be नियमसूत्र as सिद्धे सति आरभ्यमाणः नियमाय।.

[LSK] सुप्-विधौ $^{7/1}$ स्वर-विधौ $^{7/1}$ संज्ञा-विधौ $^{7/1}$ कृति $^{7/1}$ तुक्-विधौ $^{7/1}$ च $^{0}$ नलोपः $^{1/1}$ असिद्धः $^{1/1}$ न $^{0}$ अन्यत्र $^{0}$ ।

नलोप is असिद्ध only with reference to 1. सुप्-विधि, 2. स्वर-विधि, 3. संज्ञाविधि, 4. तुक्-विधि with following कृत्प्रयय, not anywhere else.

[LSK] राजाश्वः $^{1/1}$ इत्यादौ $^{7/1}$।

राजन् + ङस् + अश्व + सुँ 2.2.8 षष्ठी । ~ समासः तत्पुरुषः

| | |
|---|---|
| प्रातिपदिक-संज्ञा | 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम् |
| राजन् + अश्व | 2.4.71 सुपो धातुप्रातिपदिकयोः। ~ लुक् |
| राज + अश्व | 8.2.7 नलोपः प्रातिपदिकान्तस्य। |
| राजाश्व | 6.1.101 अकः सवर्णे दीर्घः । ~ एकः पूर्वपरयोः संहितायाम् |

For 6.1.101 अकः सवर्णे दीर्घः।, नलोप is not असिद्ध, because 6.1.101 अकः सवर्णे दीर्घः। is not any of the four विधि listed in this नियमसूत्र.

[LSK] इति $^{0}$ असिद्धत्वात् $^{5/1}$ आत्त्वम् $^{1/1}$ एत्त्वम् $^{1/1}$ ऐस्त्वम् $^{1/1}$ च $^{0}$ न $^{0}$ ।

Because of असिद्धत्व of नलोप by this नियमसूत्र, आत्-आदेश by 7.3.102 सुपि च।, एत्-आदेश by 7.3.103 बहुवचने झल्येत्।, and ऐस्-आदेश by 7.1.9 अतो भिस ऐस्। do not take place.

[LSK] राजभ्याम् $^{3/2}$ ।

राजन् + भ्याम्

राज + भ्याम्  8.2.7 नलोपः प्रातिपदिकान्तस्य।

For 7.3.102 सुपि च।, the नलोप is असिद्धवत्. Thus आत्त्व does not take place.

[LSK] राजभिः $^{3/3}$ ।

राजन् + भिस्

राज + भिस्  8.2.7 नलोपः प्रातिपदिकान्तस्य।

For 7.1.9 अतो भिस ऐस्।, the नलोप is असिद्धवत्. Thus ऐस्त्व does not take place.

राजन् + भ्यस्

राज + भ्यस्  8.2.7 नलोपः प्रातिपदिकान्तस्य।

For 7.3.103 बहुवचने झल्येत्।, the नलोप is असिद्धवत्. Thus एत्त्व does not take place.

[LSK] राज्ञि $^{7/1}$, राजनि $^{7/1}$ ।

राजन् + ङि

भ-संज्ञा  1.4.18 यचि भम् । ~ स्वादिषु असर्वनामस्थाने

राज् न् + इ  6.4.136 विभाषा ङिश्योः। ~ अत् लोपः अनः भस्य

राज् ञ् + इ  8.4.40 स्तोः श्चुना श्चुः ।

राज्ञि

अत्-लोप-अभाव-पक्षे

राजनि

[LSK] राजसु $^{7/3}$ ॥

राजन् + सुप्

राज + सु  8.2.7 नलोपः प्रातिपदिकान्तस्य।

7.3.103 बहुवचने झल्येत्।, the नलोप is असिद्धवत्. Thus एत्त्व does not take place.

राजसु

For 8.3.59 आदेशप्रत्यययोः।, नलोप is सिद्ध.

अणिमन्, प्रेमन्, उक्षन्, तक्षन्, वृषन्, मूर्धन्, etc. decline in the same manner.

## Declension of राजन् (न्-पुं-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | राजन् + सुँ<br>राजन् 6.1.68<br>राजान् 6.4.8<br>**राजा** 8.2.7 | राजन् + औ<br>राजान् + औ 6.4.8<br>**राजानौ** | राजन् + जस्<br>राजान् + अस् 6.4.8<br>**राजानः** 8.2.66, 8.3.15 |
| S | राजन् + सुँ<br>राजन् 6.1.68<br>**राजन्** <u>8.2.8</u> | same as above | same as above |
| 2 | राजन् + अम्<br>राजान् + म् 6.4.8<br>**राजानम्** | same as above | राजन् + शस्<br>राज् न् + अस् 6.4.134<br>राज् ञ् + अस् 8.4.40<br>**राज्ञः** 8.2.66, 8.3.15 |
| 3 | राजन् + टा<br>राज् न् + आ 6.4.134<br>राज् ञ् + आ 8.4.40<br>**राज्ञा** | राजन् + भ्याम्<br>राज + भ्याम् 8.2.7<br>**राजभ्याम्** 8.2.2 | राजन् + भिस्<br>राज + भिस् 8.2.7<br>**राजभिः** 8.2.2, 8.2.66, 8.3.15 |
| 4 | राजन् + ङे<br>राज् न् + ए 6.4.134<br>राज् ञ् + ए 8.4.40<br>**राज्ञे** | same as above | राजन् + भ्यस्<br>राज + भ्यस् 8.2.7<br>**राजभ्यः** 8.2.2, 8.2.66, 8.3.15 |
| 5 | राजन् + ङसिँ<br>राज् न् + अस् 6.4.134<br>राज् ञ् + अस् 8.4.40<br>**राज्ञः** 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | राजन् + ओस्<br>राज् न् + ओस् 6.4.134<br>राज् ञ् + ओस् 8.4.40<br>**राज्ञोः** 8.2.66, 8.3.15 | राजन् + आम्<br>राज् न् + आम् 6.4.134<br>राज् ञ् + आम् 8.4.40<br>**राज्ञाम्** |
| 7 | राजन् + ङि<br>राज् न् + ए 6.4.136 वा<br>राज् ञ् + ए 8.4.40<br>**राज्ञि**<br>पक्षे **राजनि** | same as above | राजन् + सुप्<br>राज + सु 8.2.7<br>**राजसु** 8.2.2 |

**<u>न-कारान्त-पुँल्लिङ्गः (2) यज्वन्</u>**

<u>य</u>जँ देवपूजासङ्गतिकरणदानेषु (1U) to worship

यज् + ङ्वनिँप् 3.2.103 सुयजोर्ङ्वनिँप् ।

यज् + वन् अनुबन्धलोपे

यज्वन् प्रातिपदिकसंज्ञा by 1.2.46 कृत्तद्धितसमासाश्च ।

[LSK] यज्वा $^{1/1}$ ।

यज्वन् + सुँ

यज्वन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

यज्वान् 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः

यज्वा 8.2.7 नलोपः प्रातिपदिकान्तस्य। ~ पदस्य

[LSK] राजानौ $^{1/2, 2/2}$ ।

राजन् + औ

राजान् + औ 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः

[LSK] राजानः $^{1/3}$ ॥

राजन् + जस्

राजान् + अस् 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः

## [निषेधसूत्रम्] 6.4.137 न संयोगाद्वमन्तात् । ~ अनः भस्य अङ्गस्य अत् लोपः

लोप of अ in अन् by 6.4.134 is prohibited when संयोग which ends with व्/म् precedes.




न $^{0}$ संयोगात् $^{5/1}$ वमन्तात् $^{5/1}$ । ~ अनः $^{6/1}$ भस्य $^{6/1}$ अङ्गस्य $^{6/1}$ अत् $^{6/1}$ लोपः $^{1/1}$

3 words in the सूत्र; 5 words as अनुवृत्ति

- न 0 – Negation to अत्-लोप.
- संयोगात् 5/1 – In पूर्वपञ्चमी.
- वमन्तात् 5/1 – वकारः च म् च वमौ (ID) । वमौ अन्तौ यस्य सः वमन्तः (116B), तस्मात् । This is adjective to संयोगात्.
- अत् 6/1 – Short अ; in स्थानेयोगा षष्ठी.
- लोपः 1/1 – This is आदेश.
- अनः 6/1 – प्रातिपदिक is अन्; in सम्बन्धषष्ठी to अत्.
- भस्य 6/1 – From अधिकारसूत्र 6.4.129 भस्य।.
- अङ्गस्य 6/1 – From अधिकारसूत्र 6.4.1अङ्गस्य।.

[LSK] वमन्त-संयोगात् $^{5/1}$ अनः $^{6/1}$ अकारस्य $^{6/1}$ लोपः $^{1/1}$ न $^{0}$।

लोप does not happen for short अ belonging to अन् which is preceded by संयोग ending with व्/म्.

[LSK] यज्वनः $^{2/3}$ । यज्वना $^{3/1}$ ।

यज्वन् + शस्

यज्वनः 6.4.134 अल्लोपोऽनः। ~ भस्य अङ्गस्य is negated by 6.4.137 न संयोगाद्वमन्तात् ।.

[LSK] यज्वभ्याम् $^{3/2}$ ।

यज्वन् + भ्याम्

यज्व + भ्याम् 8.2.7 नलोपः प्रातिपदिकान्तस्य । ~ पदस्य

## Declension of **यज्वन्** (न्-पुं-2)

### **व्/म्**-ending **संयोग** + **अन्**-ending **पुँल्लिङ्गशब्दः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | यज्वन् + सुँ<br>यज्वन् 6.1.68<br>यज्वान् 6.4.8<br>**यज्वा** 8.2.7 | यज्वन् + औ<br>यज्वान् + औ 6.4.8<br>**यज्वानौ** | यज्वन् + जस्<br>यज्वान् + अस् 6.4.8<br>**यज्वानः** 8.2.66, 8.3.15 |
| S | यज्वन् + सुँ<br>यज्वन् 6.1.68<br>**यज्वन्** 8.2.8 | same as above | same as above |
| 2 | यज्वन् + अम्<br>यज्वान् + म् 6.4.8<br>**यज्वानम्** | same as above | यज्वन् + शस्<br>**राज्वनः** <u>6.4.137</u>, 8.2.66, 8.3.15 |
| 3 | यज्वन् + टा<br>**यज्वना** <u>6.4.137</u> | यज्वन् + भ्याम्<br>यज्व + भ्याम् 8.2.7<br>**यज्वभ्याम्** 8.2.2 | यज्वन् + भिस्<br>यज्व + भिस् 8.2.7<br>**यज्वभिः** 8.2.2, 8.2.66, 8.3.15 |
| 4 | यज्वन् + ङे<br>**यज्वने** <u>6.4.137</u> | same as above | यज्वन् + भ्यस्<br>यज्व + भ्यस् 8.2.7<br>**यज्वभ्यः** 8.2.2, 8.2.66, 8.3.15 |
| 5 | यज्वन् + ङसिँ<br>**यज्वनः** <u>6.4.137</u>, 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | यज्वन् + ओस्<br>**यज्वनोः** <u>6.4.137</u>, 8.2.66, 8.3.15 | यज्वन् + आम्<br>**यज्वनाम्** <u>6.4.137</u> |
| 7 | यज्वन् + ङि<br>**यज्वनि** <u>6.4.137</u> | same as above | यज्वन् + सुप्<br>यज्व + सु 8.2.7<br>**यज्वसु** 8.2.2 |

The difference from **राजन्** is in भ. अल्लोप is prohibited by 6.4.137 **न संयोगाद्वमन्तात्**।.

[LSK] **ब्रह्मणः** $^{2/3}$ । **ब्रह्मणा** $^{3/3}$ ॥

**ब्रह्मन्**, having **म्**-ending **संयोग** before **अन्**, declines in the same manner.

**<u>न-कारान्त-पुँल्लिङ्गः (3 #1) वृत्रहन्</u>**

वृत्रं हतवान् इति वृत्रहा । The one who killed a demon called वृत्र. इन्द्र.

ह॒नँ हिंसगत्योः (2P) to kill

वृत्र + हन् + क्विप् 3.2.79 ब्रह्मभ्रूणवृत्रेषु क्विप् ।

वृत्र + हन् 6.1.66 वेरपृक्तस्य । ~ लोपः

वृत्रहन् प्रातिपदिकसंज्ञा by 1.2.46 कृत्तद्धितसमासाश्च ।

वृत्रहन् + सुँ

वृत्रहन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

Now, 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः is प्राप्त, but अपवाद is coming next.

## [नियमसूत्रम्] 6.4.12 इन्हन्पूषार्यम्णां शौ । ~ उपधायाः दीर्घः अङ्गानाम्

For अङ्गs which are इन्-प्रत्यय-ending, हन्-शब्द-ending, पूषन्-शब्द-ending, and अर्यमन्न्-शब्द-ending, उपधादीर्घ takes place only when शि follows. When other प्रत्ययs follow, उपधादीर्घ does not take place.




इन्हन्पूषार्यम्णाम् 6/3 शौ 7/1 । ~ उपधायाः 6/1 दीर्घः 1/1 अङ्गानाम् 6/3

2 words in the सूत्र; 3 words as अनुवृत्ति

- इन्हन्पूषार्यम्णाम् 6/3 – इतरेतरद्वन्द्व of इन्, हन्, पूषन्, अर्यमन्; in सम्बन्धषष्ठी to उपधायाः.
- शौ 7/1 – प्रातिपदिक is शि, enjoined by 7.1.20 जश्शसोः शिः।; in परसप्तमी.
- उपधायाः 6/1 – From 6.4.7 नोपधायाः।; in स्थानेयोगा षष्ठी.
- दीर्घः 1/1 – From 6.3.111 ढ्रलोपे पूर्वस्य दीर्घोऽणः।; this is आदेश.
- अङ्गानाम् 6/3 – From 6.4.1 अङ्गस्य।; qualified by नः, this is in सम्बन्धे षष्ठी to उपधायाः.

[LSK] एषाम् 6/3 शौ 7/1 एव 0 उपधायाः 6/1 दीर्घः 1/1 न 0 अन्यत्र 0 ॥

For those four types of अङ्गs, दीर्घ takes place only when शि follows, not anything else.

Since शि is सर्वनामस्थान by 1.1.42 शि सर्वनामस्थानम्।, उपधा दीर्घ is सिद्ध by 6.4.8 सर्वनामस्थाने चासम्बुद्धौ।. This sūtra becomes redundant unless it is taken as नियमसूत्र, as सिद्धे सति आरभ्यमाणं नियमाय।. This sūtra is to restrict the application of उपधा दीर्घ.

वृत्रहन् + सुँ

वृत्रहन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

Even though 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः is applicable, since what is following हन्-ending अङ्ग is not शि, उपधा दीर्घ is restricted by 6.4.12 इन्हनूषार्यम्णां शौ ।.

However, there is one more sūtra related to this topic.

## [विधिसूत्रम्] 6.4.13 सौ च । ~ असंबुद्धौ इन्हन्पूषार्यम्णाम् उपधायाः दीर्घः अङ्गानाम्

For अङ्गs which are इन्-प्रत्यय-ending, हन्-शब्द-ending, पूषन्-शब्द-ending, and अर्यमन्न्-शब्द-ending, उपधादीर्घ takes place when असम्बुद्धि सुँ follows.




सौ $^{7/1}$ च $^{0}$ । ~ असम्बुद्धौ $^{7/1}$ इन्हन्पूषार्यम्णाम् $^{6/3}$ उपधायाः $^{6/1}$ दीर्घः $^{1/1}$ अङ्गानाम् $^{6/3}$

2 words in the सूत्र; 5 words as अनुवृत्ति

- सौ 7/1 – प्रातिपदिक is सुँ; in परसप्तमी.
- च 0 – Bringing the same topic of उपधादीर्घ.
- असम्बुद्धौ 7/1 – From 6.4.8 सर्वनामस्थाने चासम्बुद्धौ ।; in परसप्तमी.
- इन्हन्पूषार्यम्णाम् 6/3 – From the previous नियमसूत्र 6.4.12 इन्हन्पूषार्यम्णां शौ ।.
- उपधायाः 6/1 – From 6.4.7 नोपधायाः।; in स्थानेयोगा षष्ठी.
- दीर्घः 1/1 – From 6.3.111 ढ्रलोपे पूर्वस्य दीर्घोऽणः।; this is आदेश.
- अङ्गानाम् 6/3 – From 6.4.1 अङ्गस्य।; qualified by नः, this is in सम्बन्धे षष्ठी to उपधायाः.

[LSK] इन्-आदीनाम् $^{6/3}$ उपधायाः $^{6/1}$ दीर्घः $^{1/1}$ असम्बुद्धौ $^{7/1}$ सौ $^{7/1}$ ।

For इन्-ending, etc. अङ्गs, दीर्घ takes place when असम्बुद्धि सुँ follows.

[LSK] वृत्रहा $^{1/1}$ ।

वृत्रहन् + सुँ

वृत्रहन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

वृत्रहान् 6.4.13 सौ च । ~ असंबुद्धौ इन्हन्पूषार्यम्णाम् उपधायाः दीर्घः अङ्गानाम्

वृत्रहा 8.2.7 नलोपः प्रातिपदिकान्तस्य। ~ पदस्य

[LSK] हे वृत्रहन् $^{S/1}$ ॥

वृत्रहन् + सुँ

वृत्रहन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

6.4.13 सौ च । does not apply when सम्बुद्धि follows. By 8.2.8 न ङिसम्बुद्ध्योः।, नलोप is negated for सम्बुद्धि.

## [विधिसूत्रम्] 8.4.12 एकाजुत्तरपदे णः । ~ रषाभ्याम् नः णः पूर्वपदाभ्याम् प्रातिपदिकान्तनुम्विभक्तिषु

In समास in which उत्तरपद has only one अच्, न् which is found at the end of प्रातिपदिक, in नुम्, or in विभक्ति, is replaced by ण्, when र्/ष् is in the पूर्वपद.




एकाजुत्तरपदे $^{7/1}$ णः $^{1/1}$ । ~ रषाभ्याम् $^{5/2}$ नः $^{6/1}$ णः $^{1/1}$ पूर्वपदाभ्याम् $^{5/2}$ प्रातिपदिकान्तनुम्विभक्तिषु $^{7/3}$

2 words in the सूत्र; 5 words as अनुवृत्ति

- एकाजुत्तरपदे 7/1 – एकः अच् यस्मिन् तत् पदम् एकच् (117B)। एकाच् उत्तरपदं यस्य स एकाजुत्तरपदः (116B) समासः, तस्मिन् ।; in अधिकरणे सप्तमी for all other words.
- णः 1/1 – This is आदेश. Even though णः is already taught in 8.4.1 रषाभ्यां नो णः समानपदे।, णः is taught again here to withdraw from the optional status of ण्, which was taught in 8.4.10 वा भावकरणयोः।.[5]
- रषाभ्याम् 5/2 – From 8.4.1 रषाभ्यां नो णः समानपदे।; in पूर्वपञ्चमी.
- नः 6/1 – From 8.4.1 रषाभ्यां नो णः समानपदे।; in स्थानेयोगा षष्ठी.
- णः 1/1 – From 8.4.1 रषाभ्यां नो णः समानपदे।; this is आदेश.
- पूर्वपदाभ्याम् 5/2 – From 8.4.3 पूर्वपदात् संज्ञायामगः।. पूर्वं पदं ययोः पूर्वपदौ (116B) रषौ, ताभ्याम् ।; adjective to रषाभ्याम्.
- प्रातिपदिकान्तनुम्विभक्तिषु 7/3 – From 8.4.11 प्रातिपदिकान्तनुम्विभक्तिषु च ।; प्रातिपदिकस्य अन्तः प्रातिपदिकान्तः (6T), प्रातिपदिकान्तः च नुम् च विभक्तिः च प्रातिपदिकान्तनुम्विभक्तयः (ID), तासु।; in अधिकरणे सप्तमी for नः.

---

[5][K] णः इति वर्तमाने पुनः ण-ग्रहणम् विकल्प-अधिकार-निवृत्तेः विस्पष्टीकरणार्थम् ।

[LSK] एकाजुत्तरपदम् 1/1 यस्य 6/1 तस्मिन् 7/1 समासे 7/1 पूर्वपदस्थात् 5/1 निमित्तात् 5/1 परस्य 6/1 प्रातिपदिकान्त-नुम्-विभक्तिस्थस्य 6/1 नस्य 6/1 णः 1/1।

णू is the substitute in the place of न् which is found in प्रातिपदिक-अन्त, नुम्, or विभक्ति, when the निमित्त र्/ष् is found in पूर्वपद in समास whose उत्तरपद is एकच्.

In the case of वृत्रहन्, the न् is found at the end of प्रातिपदिक.

[LSK] वृत्रहणौ 1/2 ॥

वृत्रहन् + औ

वृत्रहण् + औ  8.4.12 एकाजुत्तरपदे णः । ~ रषाभ्याम् नः णः पूर्वपदाभ्याम् प्रातिपदिकान्तनुम्विभक्तिषु

Example of न् found in नुम् – क्षीरप (क्षीरं पिबति) in neuter in 1/3 and 2/3:

क्षीरप + जस्

क्षीरप + शि  7.1.20 जश्शसोः शिः। ~ नपुंसकात्

क्षीरप न् + इ  7.1.72 नपुंसकस्य झलचः । ~ नुम्

क्षीरपा न् + इ  6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः

क्षीरपा ण् + इ  8.4.12 एकाजुत्तरपदे णः । ~ रषाभ्याम् नः णः पूर्वपदाभ्याम् प्रातिपदिकान्तनुम्विभक्तिषु

क्षीरपाणि

Example of न् found in विभक्ति – क्षीरप (क्षीरं पिबति) in 3/1:

क्षीरप + टा

क्षीरप + इन  7.1.12 टाङसिँङसामिनात्याः । ~ अतः अङ्गात्

क्षीरप + इण  8.4.12 एकाजुत्तरपदे णः । ~ रषाभ्याम् नः णः पूर्वपदाभ्याम् प्रातिपदिकान्तनुम्विभक्तिषु

क्षीरपेण  6.1.87 आद्गुणः। ~ अचि संहितायाम्

वृत्रहन् + शस्

वृत्रह् न् + अस्  6.4.134 अल्लोपोऽनः ।

## [विधिसूत्रम्] 7.3.54 हो हन्तेर्ञ्णिन्नेषु । ~ अङ्गस्य कु

ह् of हन्-धातु is replaced by घ् (its कवर्ग) when ञित्/णित्-प्रत्यय, or न् follows.




हः $^{6/1}$ हन्तेः $^{6/1}$ ञ्णिन्नेषु $^{7/3}$ । ~ अङ्गस्य $^{6/1}$ कु $^{1/1}$

3 words in the सूत्र; 2 words as अनुवृत्ति

- हः 6/1 – प्रातिपदिक is ह्; in स्थानेयोगा षष्ठी.
- हन्तेः 6/1 – प्रातिपदिक is हन्ति; धातु हन् हिंसायाम् (2P) to kill with श्तिप् प्रत्यय by (वा०) इक्-श्तिपौ धातुनिर्देशे।; in सम्बन्धे षष्ठी to हः.
- ञ्णिन्नेषु 7/1 – ञ् च ण् च ञ्णौ (ID), तौ इतौ ययोः तौ ञ्णितौ (116B) प्रत्ययौ। ञ्णितौ च नः च ञ्णिन्नाः (ID), तेषु; in परसप्तमी.
- अङ्गस्य 6/1 – From 6.4.1 अङ्गस्य।.
- कु 1/1 – From 7.3.52 चजोः कु घिण्ण्यतोः।; this is आदेश. By the help of 1.1.50 स्थानेऽन्तरतमः ।, the nearest of ह् out of five letters of कु is decided as घ्.

[LSK] ञिति $^{7/1}$ णिति $^{7/1}$ प्रत्यये $^{7/1}$ नकारे $^{7/1}$ च $^{0}$ परे $^{7/1}$ हन्तेः $^{6/1}$ हकारस्य $^{6/1}$ कुत्वम् $^{1/1}$।

कवर्ग is the substitute in the place of ह् of हन्-धातु when ञित्/णित्-प्रत्यय or a letter न् immediately follows.

[LSK] वृत्रघ्नः $^{2/3}$ इत्यादि $^{1/1}$।

वृत्रहन् + शस्

वृत्रह् न् + अस् 6.4.134 अल्लोपोऽनः ।

वृत्रघ् न् + अस् 7.3.54 हो हन्तेर्ञ्णिन्नेषु । ~ अङ्गस्य कु

वृत्रघ्नः 8.2.66, 8.3.15

Note that the उत्तरपद is not एकाच् here, thus णत्व does not take place.

## Declension of वृत्रहन् (न-पुं-3 #1)

### हन्-धातु-ending पुँल्लिङ्गशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | वृत्रहन् + सुँ<br>वृत्रहन् 6.1.68<br>वृत्रहान् 6.4.13<br>**वृत्रहा** 8.2.7 | वृत्रहन् + औ<br>**वृत्रहणौ** 8.4.12 | वृत्रहन् + जस्<br>**वृत्रहणः** 8.4.12, 8.2.66, 8.3.15 |
| S | वृत्रहन् + सुँ<br>वृत्रहन् 6.1.68<br>**वृत्रहन्** 8.2.8 | same as above | same as above |
| 2 | वृत्रहन् + अम्<br>**वृत्रहणम्** 8.4.12 | same as above | वृत्रहन् + शस्<br>वृत्रह् न् + आ 6.4.134<br>**वृत्रघ्नः** 7.3.54, 8.2.66, 8.3.15 |
| 3 | वृत्रहन् + टा<br>वृत्रह् न् + आ 6.4.134<br>**वृत्रघ्ना** 7.3.54 | वृत्रहन् + भ्याम्<br>वृत्रह + भ्याम् 8.2.7<br>**वृत्रहभ्याम्** 8.2.2 | वृत्रहन् + भिस्<br>वृत्रह + भिस् 8.2.7<br>**वृत्रहभिः** 8.2.2, 8.2.66, 8.3.15 |
| 4 | वृत्रहन् + ङे<br>वृत्रह् न् + ए 6.4.134<br>**वृत्रघ्ने** 7.3.54 | same as above | वृत्रहन् + भ्यस्<br>वृत्रह + भ्यस् 8.2.7<br>**वृत्रहभ्यः** 8.2.2, 8.2.66, 8.3.15 |
| 5 | वृत्रहन् + ङसिँ<br>वृत्रह् न् + अस् 6.4.134<br>**वृत्रघ्नः** 7.3.54, 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | वृत्रहन् + ओस्<br>वृत्रह् न् + ओस् 6.4.134<br>**वृत्रघ्नोः** 7.3.54, 8.2.66, 8.3.15 | वृत्रहन् + आम्<br>वृत्रह् न् + आम् 6.4.134<br>**वृत्रघ्नाम्** 7.3.54 |
| 7 | वृत्रहन् + ङि<br>वृत्रह् न् + आम् 6.4.136<br>**वृत्रघ्नि** 7.3.54<br>पक्षे **वृत्रहनि** 6.4.136 | same as above | वृत्रहन् + सुप्<br>वृत्रह + सु 8.2.7<br>**वृत्रहसु** 8.2.2 |

When सर्वनामस्थान follows, only for असम्बुद्धि सुँ, उपधादीर्घ takes palce by नियमसूत्र 6.4.13 सौ च।.

In भ, after अल्लोप, there is कुत्व by 7.3.54 हो हन्तेर्ञ्णिन्नेषु । ~ अङ्गस्य कु.

The rest is like राजन्.

[LSK] एवम् शार्ङ्गिन्, यशस्विन्, अर्यमन्, पूषन् ॥

These words mentioned by 6.4.12 इन्हन्पूषार्यम्णां शौ । decline in the same manner.

1. इन्-ending: शार्ङ्गिन्

शार्ङ्ग + इनिँ 5.2.115 अत इनिठनौ। ~ तत् अस्य अस्मिन् अस्ति इति

यशस्विन्

यशस् + विनिँ 5.2.121 अस्माआमेधास्रजो विनिः। ~ तत् अस्य अस्मिन् अस्ति इति

2. हन्- ending: वृत्रहन्

3. अर्यमन्

4. पूषन्

The only difference between हन्-ending and the rest is the कुत्व in भ. Other than भ, the declension is the same.

Note:

In शार्ङ्गिन्, इन् is considered to be सार्थक, a meaningful unit of letters, while in यशस्विन्, इन्, a part of विन्-प्रत्यय is considered to be अनर्थक, not a meaningful unit of letters, as per the statement "समुदायो ह्यर्थवान् तस्य एकदेशः अनर्थकः।", a part of a meaningful group of letters is called अनर्थक.

However, by परिभाषा (16) "अन्-इन्-अस्-मन्-ग्रहणानि अर्थवता च अनर्थकेन च तदन्तविधिं प्रयोजयन्ति।", mentioning of अन्, इन्, अस्, and मन् can be taken as both सार्थक and अनर्थक, with reference to तदन्तविधि, यशस्विन् is also considered to be इन्-ending here.

Examples are:

[B] राज्ञः इति अत्र अन् अर्थवान्, दाम्नः इति अनर्थकः।

अल्लोप for अन्-ending word is taught by 6.4.134 अल्लोपोऽनः।. This is applicable for both राजन् (राज् + अन्) and दामन् (अव्युत्पन्न).

[B] सुपया इति अत्र अस् अर्थवान्, सुस्रोता इति अनर्थकः।

दीर्घ for अस्-ending word is taught by 6.4.10 सान्तमहतः संयोगस्य।. This is applicable for both पयस् (पा + असुन्) and स्रोतस् (अव्युत्पन्न).

[B] सुशर्मा इति अत्र मन् अर्थवान्, सुप्रथिमा इति अनर्थकः।

मन्-ending words decline in the same manner.

[B] "4.1.11 मनः। ~ न ङीप्" इति न ङीप्।

## न-कारान्त-पुँल्लिङ्गः (3 #2) शार्ङ्गिन्

शार्ङ्गम् अस्य अस्ति इति शार्ङ्गी। one who has शार्ङ्ग, शृङ्गनिर्मितधनुस्, a bow made of horn, is called शार्ङ्गिन्.

शार्ङ्ग + इनिँ 5.2.115 अत इनिँ-ठनौ ।

शार्ङ्ग् + इन् 6.4.148 यस्येति च । ~ लोपः भस्य

शार्ङ्गिन् प्रातिपदिकसंज्ञा by 1.2.46 कृत्तद्धितसमासाश्च ।

When असम्बुद्धि सुँ follows, 6.4.13 सौ च । ~ इन्हन्पूषार्यम्णाम् नोपधायाः दीर्घः is applied. Because of this नियम, there is no नोपधादीर्घ when सर्वनामस्थान other than असम्बुद्धि सुँ.

Declension of शार्ङ्गिन् (न्-पुं-4 #1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | शार्ङ्गी 6.4.13 | शार्ङ्गिणौ 8.4.2 | शार्ङ्गिणः 8.4.2 |
| S | हे शार्ङ्गिन् | same as above | same as above |
| 2 | शार्ङ्गिणम् 8.4.2 | same as above | same as above |
| 3 | शार्ङ्गिणा 8.4.2 | शार्ङ्गिभ्याम् 8.2.7 | शार्ङ्गिभिः 8.2.7 |
| 4 | शार्ङ्गिणे 8.4.2 | same as above | शार्ङ्गिभ्यः 8.2.7 |
| 5 | शार्ङ्गिणः 8.4.2 | same as above | same as above |
| 6 | same as above | शार्ङ्गिणोः 8.4.2 | शार्ङ्गिणाम् 8.4.2 |
| 7 | शार्ङ्गिणि 8.4.2 | same as above | शार्ङ्गिषु 8.2.7 |

Unlike वृत्रहन्, there is no special modification in भ.

The rest declines like वृत्रहन्.

यशस्विन्, पूषन्, and अर्यमन् decline in the same manner as शार्ङ्गिन्

## न-कारान्त-पुँल्लिङ्गः (3 #3) पूषन्

पुष्णाति इति पूषा । The lord Sun. One who nourishes.

पुषँ पुष्टौ (9P) to nourish + कनिँन् (उ.)

पूषन् निपातनम्

प्रातिपदिकसंज्ञा by 1.2.46 कृत्तद्धितसमासाश्च ।

Declension of पूषन् (न्-पुं-3 #3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | पूषा 6.4.13 | पूषणौ 8.4.12 | पूषणः 8.4.12 |
| S | हे पूषन् | same as above | same as above |
| 2 | पूषणम् 8.4.12 | same as above | पूष्णः 6.4.134, 8.4.1 |
| 3 | पूष्णा 6.4.134, 8.4.1 | पूषभ्याम् 8.2.7 | पूषभिः 8.2.7 |
| 4 | पूष्णे 6.4.134, 8.4.1 | same as above | पूषभ्यः 8.2.7 |
| 5 | पूष्णः 6.4.134, 8.4.1 | same as above | same as above |
| 6 | same as above | पूष्णोः 6.4.134, 8.4.1 | पूष्णाम् 6.4.134, 8.4.1 |
| 7 | पूष्णि/पूषणि 6.4.134, 8.4.1 | same as above | पूषसु 8.2.7 |

## न-कारान्त-पुँल्लिङ्गः (3 #4) अर्यमन्

अर्यं श्रेष्ठं मिमीते । The lord Sun. One who measures well.

अर्य + माङ् माने (3A) to measure + कनिँन्

अर्यमन् निपातनम्

प्रातिपदिकसंज्ञा by 1.2.46 कृत्तद्धितसमासाश्च ।

Declension of अर्यमन् (न्-पुं-3 #3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | अर्यमा 6.4.13 | अर्यमणौ 8.4.12 | अर्यमणः 8.4.12 |
| S | हे अर्यमन् | same as above | same as above |
| 2 | अर्यमणम् 8.4.12 | same as above | अर्यम्णः 6.4.134, 8.4.12 |
| 3 | अर्यम्णा 6.4.134, 8.4.12 | अर्यमभ्याम् 8.2.7 | अर्यमभिः 8.2.7 |
| 4 | अर्यम्णे 6.4.134, 8.4.12 | same as above | अर्यमभ्यः 8.2.7 |
| 5 | अर्यम्णः 6.4.134, 8.4.12 | same as above | same as above |
| 6 | same as above | अर्यम्णोः 6.4.134, 8.4.12 | अर्यम्णाम् 6.4.134, 8.4.12 |
| 7 | अर्यम्णि/अर्यमणि 6.4.136, 8.4.12 | same as above | अर्यमसु 8.2.7 |

If अर्यमन् is taken as अव्युत्पन्न, not derived word, णत्व is by 8.4.2.

## न-कारान्त-पुँल्लिङ्गः (4) मघवन्

मघवन्, इन्द्र, is an उणादिप्रत्यय-ending word, formed without grammatical explanation.

महँ पूजायाम् (1P) to worship

महॄ + कनिँन् (उ०) 1.159 श्वन्...मघवन् इति।

मघवन् निपात्यते

## [विधिसूत्रम्] 6.4.128 मघवा बहुलम् । ~ तृँ

Optionally, the last letter of मघवन् is replaced by त्.




मघवा $^{1/1}$ बहुलम् $^{1/1}$ । ~ तृँ $^{1/1}$

2 words in the सूत्र; 1 word as अनुवृत्ति

- मघवा 1/1 – प्रातिपदिक is मघवन्; in षष्ठ्यर्थे प्रथमा. It was meant in स्थानेयोगा षष्ठी.
- बहुलम् 1/1 – Variously, optionally.
- तृँ 1/1 – From 6.4.128 अर्वणस्त्रसावनञः।; this is आदेश. ऋँ is इत्.

[LSK] मघवन्-शब्दस्य $^{6/1}$ वा $^{0}$ तृँ $^{1/1}$ इति $^{0}$ अन्त-आदेशः $^{1/1}$ ।

For इन्-ending, etc. अङ्गs, दीर्घ takes place when असम्बुद्धि सुँ follows.

[LSK] ऋँ $^{1/1}$ इत् $^{1/1}$ ॥

Being अनुनासिक, ऋँ is इत्.

Because this sūtra does not have any निमित्त, तृँ-आदेश can come before suffixing सुप्-प्रयय.

First, declension of मघवन् with तृँ-आदेश is studied.

मघवतृँ 6.4.128 मघवा बहुलम् । ~ तृँ

मघवतृँ + सुँ

## [विधिसूत्रम्] 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः । ~ नुम्

नुम्-आगम is attached to non-धातु उगित् word or अञ्चु-धातु whose न् is elided, when सर्वनामस्थान follows.




उगिदचाम्$^{6/3}$ सर्वनामस्थाने$^{7/1}$ अधातोः$^{6/1}$ । ~ नुम्$^{1/1}$

3 words in the सूत्र; 1 word as अनुवृत्ति

- उगिदचाम् 6/3 – उक् इत् येषां ते उगितः (116B), those of whom इत् is उँ, ऋँ, लृँ । उगितः च अच् च उगितचः (ID), तेषाम्।; in स्थानेयोगा षष्ठी.
- सर्वनामस्थाने 7/1 – In परसप्तमी.
- अधातोः 6/1 – This is adjective to उगित्.
- नुम् 1/1 – This is आगम. Being मित्, परिभाषासूत्र 1.1.47 मिदचोऽन्त्यात्परः। is used.

[LSK] अधातोः$^{6/1}$ उगितः$^{6/1}$ न-लोपिनः$^{6/1}$ अञ्चतेः$^{6/1}$ च$^{0}$ नुम्$^{1/1}$ स्यात्$^{III/1}$ सर्वनामस्थाने$^{7/1}$ परे$^{7/1}$ ।

नुम् is the augment for उगित् other than धातु and अञ्चु-धातु without elision of न्, when followed by सर्वनामस्थान.

[LSK] मघवान्$^{1/1}$ ।

| | |
|---|---|
| मघवतृँ | 6.4.128 मघवा बहुलम् । ~ तृँ |
| मघवतृँ + सुँ | 4.1.2 स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । ~ ङ्याप्प्रातिपदिकात् |
| मघवन्त् + स् | 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः। |
| मघवन्त् | 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः |
| मघवन् | 8.2.23 संयोगान्तस्य लोपः । ~ पदस्य |
| मघवान् | 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ दीर्घः |

Here, असिद्धत्व of 8.2.23 संयोगान्तस्य लोपः । is dismissed by बहुलत्व of 6.4.128 मघवा बहुलम् ।.

[LSK] मघवन्तौ$^{1/2}$ । मघवन्तः$^{1/3}$ ।

| | |
|---|---|
| मघवतृँ + औ | 4.1.2 स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । ~ ङ्याप्प्रातिपदिकात् |
| मघवन्त् + औ | 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः।, 8.2.24 नश्चापदान्तस्य झलि। , 8.4.58 परसवर्णः । |

[LSK] हे मघवन्[S/1] ।

मघवतृँ + सुँ

मघवन्त् + स्  7.1.70 उगिदचां सर्वनामस्थानेऽधातोः।

मघवन्त्  6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

मघवन्  8.2.23 संयोगान्तस्य लोपः । ~ पदस्य

[LSK] मघवद्भ्याम्[3/2] ।

मघवतृँ + भ्याम्

मघवद् + भ्याम्  8.2.39 झलां जशोऽन्ते ।

Declension of **मघवन्** (न्-पुं-4 #1)

**तृँ-आदेश-पक्षे**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | मघवतृँ + सुँ<br>मघवन्त् + स् 7.1.70<br>मघवन्त् 6.1.68<br>मघवान्त् 6.4.8<br>**मघवान्** 8.2.23 | मघवतृँ + औ<br>**मघवन्तौ** 7.1.70 | मघवतृँ + जस्<br>**मघवन्तः** 7.1.70, 8.2.66, 8.3.15 |
| S | मघवतृँ + सुँ<br>मघवन्त् + स् 7.1.70<br>मघवन्त् 6.1.68<br>**मघवन्** 8.2.23 | same as above | same as above |
| 2 | मघवतृँ + अम्<br>**मघवन्तम्** 7.1.70 | same as above | मघवतृँ + शस्<br>**मघवतः** 8.2.66, 8.3.15 |
| 3 | मघवतृँ + टा<br>**मघवता** | मघवतृँ + भ्याम्<br>**मघवद्भ्याम्** 8.2.39 | मघवतृँ + भिस्<br>**मघवद्भिः** 8.2.39, 8.2.66, 8.3.15 |
| 4 | मघवतृँ + ङे<br>**मघवते** | same as above | मघवतृँ + भ्यस्<br>**मघवद्भ्यः** 8.2.39, 8.2.66, 8.3.15 |
| 5 | मघवतृँ + ङसिँ<br>**मघवतः** 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | मघवतृँ + ओस्<br>**मघवतोः** 8.2.66, 8.3.15 | मघवतृँ + आम्<br>**मघवताम्** |
| 7 | मघवतृँ + ङि<br>**मघवति** | same as above | मघवतृँ + सुप्<br>मघवद् + सु 8.2.39<br>**मघवत्सु** 8.4.55 |

[LSK] तृँत्व-अभावे मघवा $^{1/1}$ ।

When तृँ-आदेश does not take place, -

मघवन् + सुँ

मघवन् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

मघवान् 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ दीर्घः

मघवा 8.2.7 नलोपः प्रातिपदिकान्तस्य। ~ पदस्य

[LSK] सुँटि $^{7/1}$ राजवत् $^{0}$ ॥

In सर्वनामस्थान, मघवन् declines like राजन्-शब्द.

In भ, the next sūtra is required.

Declension of मघवन् (न्-पुं-4 #2)

**तृँ-अभाव-पक्षे**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | **मघवा** | **मघवानौ** | **मघवानः** |
| S | **मघवन्** | same as above | same as above |
| 2 | **मघवानम्** | same as above | मघवन् + शस्<br>मघ उ अन् + अस् <u>6.4.133</u><br>मघ उन् + अस् 6.1.108<br>मघोन् + अस् 6.1.87<br>**मघोनः** 8.2.66, 8.3.15 |
| 3 | मघवन् + टा<br>**मघोना** | **मघवभ्याम्** | **मघवभिः** |
| 4 | मघवन् + ङे<br>**मघोने** | same as above | **मघवभ्यः** |
| 5 | मघवन् + ङसिँ<br>**मघोनः** | same as above | same as above |
तादृष् + भ्याम् 8.2.36 व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ~ झलि पदस्य अन्ते च

तादृड् + भ्याम् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

तादृग् + भ्याम् 8.2.62 क्विन्प्रत्ययस्य कुः ।~ पदस्य अन्ते

## Declension of तादृश् (श-पुं-1)

क्विन्-प्रत्यय-अन्त-दृश्-धातु-अन्त-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | तादृक्/तादृग् 6.1.68, 8.2.36, 8.2.39, 8.2.62, 8.4.56 | तादृशौ | तादृशः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | तादृशम् | same as above | same as above |
| 3 | तादृशा | तादृग्भ्याम् 8.2.36, 8.2.39, 8.2.62 | तादृग्भिः 8.2.36, 8.2.39, 8.2.62, 8.2.66, 8.3.15 |
| 4 | तादृशे | same as above | तादृग्भ्यः 8.2.36, 8.2.39, 8.2.62, 8.2.66, 8.3.15 |
| 5 | तादृशः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | तादृशोः 8.2.66, 8.3.15 | तादृशाम् |
| 7 | तादृशि | same as above | तादृक्षु 8.2.36, 8.2.39, 8.2.62, 8.3.59, 8.4.55 |

यादृश् (like which), एतादृश् (like this), त्वादृश् (like you), मादृश् (like me), अस्मादृश् (like us), युष्मादृश् (like you), भवादृश् (like respected you), कीदृश् (like what), ईदृश् (like this), etc. decline in the same manner.

When कञ् is suffixed, the declension is as अ-ending.

तद् + दृश् + कञ् 3.2.60 त्यदादिषु दृशोऽनालोचने कञ्च । ~ क्विन् धातोः प्रत्ययः परश्च

तद् + दृश् + अ क् and ञ् are इत्s.

त आ + दृश 6.3.91 आ सर्वनाम्नः । ~ दृग्-दृश-वतुँषु

ता + दृश 6.1.101 अकः सवर्णे दीर्घः । ~ संहितायाम्

In feminine, ङीप् is added to कञ्-ending word by 4.1.15. The form will be तादृशी, and declines like नदी.

## श-कारान्त-पुँल्लिङ्गः (2) विश्

विश् (one which enters)

वि॒शँ प्रवेशने (6P) to enter

विश् + क्विप् 	3.2.76 क्विप् च । ~ धातोः प्रत्ययः परश्च

विश् 	6.1.67 वेरपृक्तस्य । ~ लोपः

विश् 	1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] "व्रश्च..." इति $^{0}$ षः $^{1/1}$ । जश्त्व-चर्त्वे $^{1/2}$ । विट् $^{1/1}$, विड् $^{1/1}$ । विशौ $^{1/2}$ । विशः $^{1/3}$ । विड्भ्याम् $^{3/2}$ ॥

विश् + सुँ

विश् 	6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

विष् 	8.2.36 व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ~ झलि पदस्य अन्ते च

विड् 	8.2.39 झलां जशोऽन्ते । ~ पदस्य

विट् 	8.4.56 वाऽवसाने । ~ चर् झलाम्

Declension of विश् (श-पुं-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | विट्/विड् 6.1.68, 8.2.36, 8.2.39, 8.4.56 | विशौ | विशः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | विशम् | same as above | same as above |
| 3 | विशा | विड्भ्याम् 8.2.36, 8.2.39 | विड्भिः 8.2.36, 8.2.39, 8.2.66, 8.3.15 |
| 4 | विशे | same as above | विड्भ्यः 8.2.36, 8.2.39, 8.2.66, 8.3.15 |
| 5 | विशः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | विशोः 8.2.66, 8.3.15 | विशाम् |
| 7 | विशि | same as above | विट्त्सु/विट्सु 8.2.36, 8.2.39, 8.3.29, 8.4.55 |

## श-कारान्त-पुँल्लिङ्गः (3) नश्

नश् (one which perishes)

णशँ अदर्शने (4P) to be lost, to perish

| | |
|---|---|
| नश् | 6.1.65 णो नः । ~ धात्वादेः |
| नश् + क्विप् | 3.2.76 क्विप् च । ~ धातोः प्रत्ययः परश्च |
| नश् | 6.1.67 वेरपृक्तस्य । ~ लोपः |
| नश् | 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम् |

### [विधिसूत्रम्] 8.2.63 नशेर्वा । ~ कुः पदस्य अन्ते

For नश्-धातु, कु is optional at the end of पद.




नशेः $^{6/1}$ वा $^{0}$ । ~ कुः $^{1/1}$ पदस्य $^{6/1}$ अन्ते $^{7/1}$

2 words in the सूत्र; 3 words as अनुवृत्ति

- नशेः 6/1 – नश्-धातु; in स्थानेयोगा षष्ठी.
- वा 0 – कुत्व is optional.
- कुः 1/1 – From 8.2.62 क्विन्प्रत्ययस्य कुः।; this is आदेश. 1.1.52 अलोऽन्त्यस्य । is required.
- पदस्य 6/1 – From अधिकारसूत्र 8.1.16 पदस्य।; in सम्बन्धे षष्ठी to अन्ते.
- अन्ते 7/1 – From 8.2.29 स्कोः संयोगाद्योरन्ते च ।; in अधिकरणे सप्तमी.

[LSK] नशेः $^{6/1}$ कवर्गः $^{1/1}$ अन्तादेशः $^{1/1}$ वा $^{0}$ पदान्ते $^{7/1}$ ।

कवर्ग is optionally the substitute in the place of the last letter of नश्-धातु, at the end of पद.

[LSK] नक् $^{1/1}$, नग् $^{1/1}$, नट् $^{1/1}$, नड् $^{1/1}$ ।

नश् + सुँ

नश् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

नष् 8.2.36 व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ~ झलि पदस्य अन्ते च

नड् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

नग् 8.2.63 नशेर्वा । ~ कुः पदस्य अन्ते

नक् 8.4.56 वाऽवसाने । ~ चर् झलाम्

पक्षे

नट् 8.4.56 वाऽवसाने । ~ चर् झलाम्

[LSK] नशौ $^{1/2}$। नशः $^{1/3}$।

[LSK] नग्भ्याम् $^{3/2}$, नड्भ्याम् $^{3/2}$।

नश् + भ्याम्

नष् + भ्याम् 8.2.36 व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ~ झलि पदस्य अन्ते च

नड् + भ्याम् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

नग् + भ्याम् 8.2.63 नशेर्वा । ~ कुः पदस्य अन्ते

Declension of नश् (श्-पुं-3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | नक्/नग्/नट्/नड् 6.1.68, 8.2.36, 8.2.39, <u>8.2.63</u>, 8.4.56 | नशौ | नशः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | नशम् | same as above | same as above |
| 3 | नशा | नग्भ्याम्/नड्भ्याम् 8.2.36, 8.2.39, <u>8.2.63</u> | नग्भिः/नड्भिः 8.2.36, 8.2.39, <u>8.2.63</u>, 8.2.66, 8.3.15 |
| 4 | नशे | same as above | नग्भ्यः/नड्भ्यः 8.2.36, 8.2.39, <u>8.2.63</u>, 8.2.66, 8.3.15 |
| 5 | नशः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | नशोः 8.2.66, 8.3.15 | नशाम् |
| 7 | नशि | same as above | नक्षु/नट्त्सु/नट्सु 8.2.36, 8.2.39, <u>8.2.63</u>, 8.3.29, 8.4.55 |

## श-कारान्त-पुँल्लिङ्गः (4) घृतस्पृश्

घृतस्पृश् (one who touches the ghee) is a क्विन्-प्रत्यय-अन्त-प्रातिपदिक by the next sūtra.

### [विधिसूत्रम्] 3.2.58 स्पृशोऽनुदके क्विन् । ~ सुपि

With सुबन्त-उपपद other than उदक, स्पृश्-धातु takes क्विन्-प्रत्यय.

स्पृशः $^{5/1}$ अनुदके $^{7/1}$ क्विन् $^{1/1}$ । ~ सुपि $^{7/1}$

3 words in the सूत्र; 1 word as अनुवृत्ति

- स्पृशः 5/1 – स्पृशँ संस्पर्शने (6P) to touch; in दिग्योगे पञ्चमी to परः प्रत्ययः.
- अनुदके 7/1 – न उदकम् अनुदकम् (NT), तस्मिन्।; समानाधिकरण to सुपि. "सुप्-उपपद other than उदक."[15]
- क्विन् 1/1 – This is प्रत्यय. The content of प्रत्यय is व् only. क् and न् are इत्. इ is for उच्चारण.
- सुपि 7/1 – From 3.2.4 सुपि स्थः ।. By प्रत्ययग्रहणे तदन्तग्रहणम्, सुबन्त is understood; in उपपदसप्तमी taught by 3.1.92 तत्रोपपदं सप्तमीस्थम् ।.

[LSK] अनुदके $^{7/1}$ सुपि $^{7/1}$ उपपदे $^{7/1}$ स्पृशेः $^{5/1}$ क्विन् $^{1/1}$ ।

क्विन् is the प्रत्यय after स्पृश्-धातु when there is सुबन्द as उपपद but not the word "उदक".

[LSK] घृतस्पृक् $^{1/1}$, घृतस्पृग् $^{1/1}$ ।

घृत + ङस् + स्पृश् + क्विन् 3.2.58 स्पृशोऽनुदके क्विन् । ~ सुपि

Note that घृत takes कर्मणि षष्ठी by 2.3.65 कर्तृकर्मणोः कृति। because स्पृश् is कृदन्त.

घृत + ङस् + स्पृश् 6.1.67 वेरपृक्तस्य । ~ लोपः

घृत + स्पृश् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्, 2.4.71 सुपो धातुप्रातिपदिकयोः । ~ लुक्

घृतस्पृश्

---

[15] Because of this statement of "अनुदके", क्विप् also does not come. अण् by 3.2.1 कर्मण्यण् । is suffixed for उदक + स्पृश् and it declines as अ-ending प्रातिपदिक.

घृतस्पृश् + सुँ　4.1.2 स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । ~ ङ्याप्प्रातिपदिकात्

घृतस्पृश्　6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

घृतस्पृष्　8.2.36 व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ~ झलि पदस्य अन्ते च

घृतस्पृड्　8.2.39 झलां जशोऽन्ते । ~ पदस्य

घृतस्पृग्　8.2.62 क्विन्प्रत्ययस्य कुः ।~ पदस्य अन्ते

घृतस्पृक्　8.4.56 वाऽवसाने । ~ चर् झलाम्

[LSK] घृतस्पृशौ [1/2] । घृतस्पृशः [1/3] ॥

Declension of घृतस्पृश् (श-पुं-4)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | घृतस्पृक्/घृतस्पृग् 6.1.68, 8.2.36, 8.2.39, 8.2.62, 8.4.56 | घृतस्पृशौ | घृतस्पृशः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | घृतस्पृशम् | same as above | same as above |
| 3 | घृतस्पृशा | घृतस्पृग्भ्याम् 8.2.36, 8.2.39, 8.2.62 | घृतस्पृग्भिः 8.2.36, 8.2.39, 8.2.62, 8.2.66, 8.3.15 |
| 4 | घृतस्पृशे | same as above | घृतस्पृग्भ्यः 8.2.36, 8.2.39, 8.2.62, 8.2.66, 8.3.15 |
| 5 | घृतस्पृशः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | घृतस्पृशोः 8.2.66, 8.3.15 | घृतस्पृशाम् |
| 7 | घृतस्पृशि | same as above | घृतस्पृक्षु 8.2.36, 8.2.39, 8.2.62, 8.3.59, 8.4.55 |

The entire declension is like तादृश्.

## ष्-कारान्त-पुँल्लिङ्गः (1) दधृष्

दधृष् (one who does boldly)

ञिधृषाँ प्रागल्भ्ये (5P) to be bold, to be confident

धृष् + क्विन् 3.2.59 ऋत्विग्दधृक्स्रग्दिगुष्णिग् अञ्चुयुजिक्रुञ्चां च । ~ क्विन्

दधृष् The form is made as निपातनम्, irregular form

प्रातिपदिकसंज्ञा 3.1.93 कृदतिङ् ।, 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] दधृक् $^{1/1}$, दधृग् $^{1/1}$ ।

दधृष् + सुँ

दधृष् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

दधृड् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

दधृग् 8.2.62 क्विन्प्रत्ययस्य कुः ।~ पदस्य अन्ते

दधृक् 8.4.56 वाऽवसाने । ~ चर् झलाम्

[LSK] दधृषौ $^{1/2}$ । दधृषः $^{1/3}$ । दधृग्भ्याम् $^{3/2}$ ॥

दधृष् + भ्याम्

दधृड् + भ्याम् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

दधृग् + भ्याम् 8.2.62 क्विन्प्रत्ययस्य कुः ।~ पदस्य अन्ते

Declension of दधृष् (ष्-पुं-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | दधृक्/दधृग् 6.1.68, 8.2.39, 8.2.62, 8.4.56 | दधृषौ | दधृषः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | दधृषम् | same as above | same as above |
| 3 | दधृषा | दधृग्भ्याम् 8.2.39, 8.2.62 | दधृग्भिः 8.2.39, 8.2.62, 8.2.66, 8.3.15 |
| 4 | दधृषे | same as above | दधृग्भ्यः 8.2.39, 8.2.62, 8.2.66, 8.3.15 |
| 5 | दधृषः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | दधृषोः 8.2.66, 8.3.15 | दधृषाम् |
| 7 | दधृषि | same as above | दधृक्षु 8.2.39, 8.2.62, 8.3.59, 8.4.55 |

## ष-कारान्त-पुँल्लिङ्गः (2) रत्नमुष्

रत्नमुष् (one who steals gem stones)

रत्नानि मुष्णाति इति रत्नमुट् ।

मुषँ स्तेये (9P) to steal

रत्न + आम् + मुष् + क्विप् 3.2.76 क्विप् च ।

[LSK] रत्नमुट् $^{1/1}$, रत्नमुड् $^{1/1}$ ।

रत्नमुष् + सुँ

रत्नमुष् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

रत्नमुड् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

रत्नमुट् 8.4.56 वाऽवसाने । ~ चर् झलाम्

[LSK] रत्नमुषौ $^{1/2}$ । रत्नमुड्भ्याम् $^{3/2}$ ॥

रत्नमुष् + भ्याम्

रत्नमुड् + भ्याम् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

Declension of रत्नमुष् (ष-पुं-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | रत्नमुट्/रत्नमुड् 6.1.68, 8.2.39, 8.4.56 | रत्नमुषौ | रत्नमुषः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | रत्नमुषम् | same as above | same as above |
| 3 | रत्नमुषा | रत्नमुड्भ्याम् 8.2.39 | रत्नमुड्भिः 8.2.39, 8.2.66, 8.3.15 |
| 4 | रत्नमुषे | same as above | रत्नमुड्भ्यः 8.2.39, 8.2.66, 8.3.15 |
| 5 | रत्नमुषः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | रत्नमुषोः 8.2.66, 8.3.15 | रत्नमुषाम् |
| 7 | रत्नमुषि | same as above | रत्नमुट्त्सु/रत्नमुट्सु 8.2.39, 8.3.29, 8.4.55 |

## ष्-कारान्त-पुँल्लिङ्गः (3) षष्

षष् (six) is given षट् संज्ञा by 1.1.24 ष्णान्ता षट् ।. This is नित्य-बहुवचन-अन्त.

[LSK] षट् $^{1/3, 2/3}$, षड् $^{1/3, 2/3}$ ।

षष् + जस्

षष् 7.1.22 षड्भ्यो लुक् । ~ जश्शसोः

षड् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

षड् 8.4.56 वाऽवसाने । ~ चर् झलाम्

[LSK] षड्भिः $^{3/3}$ । षड्भ्यः $^{4/3}$ ।

[LSK] षण्णाम् $^{6/3}$ ।

षष् + आम्

षष् + नाम् 7.1.55 षट्-चतुर्भ्यश्च । ~ नुट्

षड् + नाम् 8.2.39 झलां जशोऽन्ते ।

षड् + णाम् 8.4.41 ष्टुना ष्टुः । ~ स्तोः

Here, in the negation of ष्टुत्व by 8.4.42 न पदान्ताट्टोरनाम् । along with (वा०) अनाम्नवतिनगरीनामिति वाच्यम्।, "नाम्" is excluded.

षण् + णाम् (वा०) प्रत्यये भाषायां नित्यम् ।, regarding 8.4.45 यरोऽनुनासिकेऽनुनासिको वा ।

षण्णाम्

[LSK] षट्त्सु $^{7/3}$, षट्सु $^{7/3}$ ॥

Declension of षष् (ष्-पुं-3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | | षट्/षड् 7.1.22, 8.2.39, 8.4.56 |
| S | | | |
| 2 | | | same as above |
| 3 | | | षड्भिः 8.2.39, 8.2.66, 8.3.15 |
| 4 | | | षड्भ्यः 8.2.39, 8.2.66, 8.3.15 |
| 5 | | | same as above |
| 6 | | | षण्णाम् 7.1.55, 8.2.39, 8.4.41 |
| 7 | | | षट्त्सु/षट्सु 8.2.39, 8.3.29, 8.4.55 |

## <u>ष्-कारान्त-पुँल्लिङ्गः (4) पिपठिष्</u>

पिपठिष् (one who desires to study)

पठँ व्यक्तायां वाचि (1P) to study

पठ् + सन् 3.1.7 धातोः कर्मणः समानार्तृकादिच्छायां वा । ~ सन् प्रत्ययः परश्च

पठ् + इट् स 7.2.35 आर्धधातुकस्येड् वलादेः ।

पठ् + इष 8.3.59 आदेशप्रत्यययोः । ~ इण्कोः सः मूर्धन्यः

पठ् पठ् + इष 6.1.9 सन्यङोः । ~ द्वे

प पठ् + इष 7.4.60 हलादिः शेषः । ~ अभ्यासस्य

पि पठ् + इष 7.4.79 सन्यतः । ~ अभ्यासस्य इत्

पिपठिष 3.1.32 सनाद्यन्ता धातवः ।

पिपठिष + क्विप् 3.2.76 क्विप् च ।

पिपठिष 6.1.67 वेरपृक्तस्य । ~ लोपः

पिपठिष् 6.4.48 अतो लोपः । ~ आर्धधातुके

[LSK] रुँत्वम् $^{2/1}$ प्रति $^{0}$ षत्वस्य $^{6/1}$ असिद्धत्वात् $^{5/1}$ "ससजुषो रुँः (8.2.66)" इति $^{0}$ रुँत्वम् $^{1/1}$ ॥

The status of being ष् (by 8.3.59 आदेशप्रत्यययोः ।) is असिद्ध from the view of 8.2.66 ससजुषो रुँः ।. Thus, ष् is considered to be the original form, स्, by 8.2.66 ससजुषो रुँः ।.

पिपठिष् + सुँ

पिपठिष् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

पिपठिरुँ 8.2.66 ससजुषो रुँः । ~ पदस्य

To be continued with the next sūtra.

## [विधिसूत्रम्] 8.2.76 र्वोरुपधाया दीर्घ इकः । ~ धातोः पदस्य अन्ते

There is an elongation of इक् which is उपधा of र्/व्-ending धातु at the end of पद.




र्वोः $^{6/2}$ उपधायाः $^{6/1}$ दीर्घः $^{1/1}$ इकः $^{6/1}$ । ~ धातोः $^{6/1}$ पदस्य $^{6/1}$ अन्ते $^{7/1}$

4 words in the सूत्र; 3 words as अनुवृत्ति

- र्वोः 6/2 – र् च व् च र्वौ (ID), तयोः ।; this is adjective to धातोः. With तदन्तविधि, it results in "र्/व्-ending धातु"
- उपधायाः 6/1 – The second to last letter; in स्थानेयोगा षष्ठी.
- दीर्घः 1/1 – This is आदेश.
- इकः 6/1 – प्रत्याहारः इक्; this is समानाधिकरण to उपधायाः.
- धातोः 6/1 – From 8.2.74 सिपि धातो रुर्वा।; this is adjective to पदस्य. With तदन्तविधि, it results in "रेफ-वकार-अन्त-धातु-अन्तस्य पदस्य".
- पदस्य 6/1 – From अधिकारसूत्र 8.1.16 पदस्य।; in सम्बन्धे षष्ठी to अन्ते.
- अन्ते 7/1 – From 8.2.29 स्कोः संयोगाद्योरन्ते च।; in अधिकरणे सप्तमी.

[LSK] रेफ-व-अन्तयोः $^{6/2}$ धात्वोः $^{6/2}$ उपधायाः $^{6/1}$ इकः $^{6/1}$ दीर्घः $^{1/1}$ पदान्ते $^{7/1}$ ।

दीर्घ is the substitute in the place of उपधा इक् of र्/व्-ending धातु, which is at the end of पद.

[LSK] पिपठीः $^{1/1}$ ।

पिपठिष् + सुँ

| | |
|---|---|
| पिपठिष् | 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः |
| पिपठिरुँ | 8.2.66 ससजुषो रुँः । ~ पदस्य |
| पिपठीर् | 8.2.76 र्वोरुपधाया दीर्घ इकः । ~ धातोः पदस्य अन्ते |
| पिपठीः | 8.3.15 खरवसानयोर्विसर्जनीयः। ~ रः पदस्य |

[LSK] पिपठिषौ $^{1/2}$ ।

पिपठिष् + औ

[LSK] पिपठीर्भ्याम्$^{3/2}$ ॥

पिपठिष् + भ्याम्

पिपठिरुँ + भ्याम्  8.2.66 ससजुषो रुँः । ~ पदस्य

पिपठीर् + भ्याम्  8.2.76 र्वोरुपधाया दीर्घ इकः । ~ धातोः पदस्य अन्ते

पिपठिष् + सुप्$^{7/3}$

पिपठिरुँ + सु  8.2.66 ससजुषो रुँः । ~ पदस्य

पिपठीर् + सु  8.2.76 र्वोरुपधाया दीर्घ इकः । ~ धातोः पदस्य अन्ते

पिपठीः + सु  8.3.16 रोः सुपि ।

रेफ followed by सुप् can become विसर्ग only when रेफ is of रुँ.

पिपठीस् + सु  8.3.36 वा शरि । ~ विसर्जनीयस्य सः

Because of the intervention of स्, the ई cannot become निमित्त for मूर्धन्य on the स् of प्रत्यय by 8.3.59 आदेश-प्रत्यययोः ।. However the next sūtra gives permission for certain letters to be interventions.

## [विधिसूत्रम्] 8.3.58 नुम्विसर्जनीयशर्व्यवायेऽपि । ~ इण्कोः सः मूर्धन्यः

Any one of नुम्/विसर्ग/शर् can intervine between स् and इण्कु for the change to मूर्धन्य.




नुम्-विसर्जनीय-शर्-व्यवाये$^{7/1}$ अपि$^{0}$ । ~ इण्कोः$^{6/1}$ सः$^{6/1}$ मूर्धन्यः$^{1/1}$

2 words in the सूत्र; 3 words as अनुवृत्ति

- नुम्-विसर्जनीय-शर्-व्यवाये 7/1– नुम् च विसर्जनीयः च शर् च नुम्-विसर्जनीय-शरः (ID)। तेषां व्यवायः व्यवधानम् (6T), तस्मिन् ।; in सति सप्तमी.
- अपि 0 – "Even" if there is an intervention of नुम्/विसर्ग/शर्.
- इण्कोः 6/1 – From अधिकारसूत्र 8.3.57 इण्कोः।; इण् च कुः च इण्कु (SD), तस्य।; प्रत्याहारः इण्; all vowels except अवर्ण, and ह्, य्, व्, र्, ल्; कु represents all कवर्ग; in पूर्वपञ्चमी.
- सः 6/1 – From 8.3.56 सहेः साडः सः।; in स्थानेयोगा षष्ठी.
- मूर्धन्यः 1/1 – This is आदेश; from अधिकारसूत्र 8.3.55 अपदान्तस्य मूर्धन्यः।.

[LSK] एतैः 3/3 प्रत्येकम् 0 व्यवधाने 7/1 अपि 0 इण्कुभ्याम् 5/2 परस्य 6/1 सस्य 6/1 मूर्धन्य-आदेशः 1/1 ।

The substitute of मूर्धन्य for स् after इण्कु will take place even if there is an intervention by any one of these letters (नुम्/विसर्ग/शर्).

[LSK] ष्टुत्वेन 3/1 पूर्वस्य 6/1 षः 1/1 ।

After changing into मूर्धन्य, the ष् becomes the cause for ष्टुत्व for the स्.

[LSK] पिपठीष्षु 7/3, पिपठीःषु 7/3 ॥

पिपठिष् + सुप्

पिपठिरुँ + सु 8.2.66 ससजुषो रुँः । ~ पदस्य

पिपठीर् + सु 8.2.76 र्वोरुपधाया दीर्घ इकः । ~ धातोः पदस्य अन्ते

पिपठीः + सु 8.3.16 रोः सुपि ।

पिपठीस् + सु 8.3.36 वा शरि । ~ विसर्जनीयस्य सः

पिपठीस् + षु 8.3.58 नुम्विसर्जनीयशर्व्यवायेऽपि । ~ मूर्धन्यः

पिपठीष् + षु 8.4.41 ष्टुना ष्टुः । ~ स्तोः

विसर्जनीयस्य सकार-आदेश-अभाव-पक्षे, if 8.3.36 वा शरि । is not taken,

पिपठीः + षु 8.3.58 नुम्विसर्जनीयशर्व्यवायेऽपि । ~ मूर्धन्यः

Declension of पिपठिष् (ष्-पुं-4)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | पिपठीः 6.1.68, 8.2.66, 8.2.76, 8.3.15 | पिपठिषौ | पिपठिषः 8.2.66, 8.3.15 |
| S | same as above | same as above | same as above |
| 2 | पिपठिषम् | same as above | same as above |
| 3 | पिपठिषा | पिपठीर्भ्याम् 8.2.66, 8.2.76 | पिपठीर्भिः 8.2.66, 8.2.76, 8.2.66, 8.3.15 |
| 4 | पिपठिषे | same as above | पिपठीर्भ्यः 8.2.66, 8.2.76, 8.2.66, 8.3.15 |
| 5 | पिपठिषः 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | पिपठिषोः 8.2.66, 8.3.15 | पिपठिषाम् |
| 7 | पिपठिषि | same as above | पिपठीःषु/पिपठीष्षु 8.2.66, 8.2.76, 8.3.15, 8.3.36, 8.3.58, 8.4.41 |

## <u>ष्-कारान्त-पुँल्लिङ्गः (5) चिकीर्ष्</u>

चिकीर्ष् (one who desires to do) is derived from सन्नन्त-धातु with क्विप्, like the previous प्रातिपदिक. The difference in declension is because of the रेफ preceding the last ष्. This conjunct consonants of रेफ and ष् (स्) brings 8.2.24 रात्सस्य ।, instead of 8.2.66 ससजुषो रुँः।.

डुकृञ् करणे (8U) to do

कृ + सन् 3.1.7 धातोः कर्मणः समानकर्तृकादिच्छायां वा ।

सन् is किद्वत् by 1.2.9 इको झल् । ~ सन् कित्

कृ + स 6.4.16 अज्झनगमां सनि । ~ क्झिलोः क्ङिति

किर् + स 7.1.100 ॠत इद्धातोः । ~ अङ्गस्य

किर् + किर् + स 6.1.9 सन्यङोः ।

कि + किर् + स 7.4.60 हलादि शेषः । ~ अभ्यासस्य

चि + किर् + स 7.4.62 कुहोश्चुः । ~ अभ्यासस्य

चि + कीर् + स 8.2.77 हलि च । ~ र्वोः उपधायाः दीर्घः इकः धातोः

चि + कीर् + ष 8.3.59 आदेशप्रत्यययोः ।

चिकीर्ष 3.1.32 सनाद्यन्ता धातवः ।

चिकीर्ष + क्विप् 3.2.76 क्विप् च ।

चिकीर्ष् 6.4.48 अतो लोपः । ~ आर्धधातुके

चिकीर्ष् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] चिकीः $^{1/1}$ ।

चिकीर्ष् + सुँ $^{1/1}$

चिकीर्ष् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

चिकीर् 8.2.24 रात् सस्य । (8.2.23 संयोगान्तस्य लोपः ।) ष् is असिद्ध for 8.2.24.

चिकीः 8.3.15 खरवसानयोर्विसर्जनीयः । ~ रः पदस्य

[LSK] चिकीर्षौ $^{1/2}$ ।

चिकीर्ष् + औ

[LSK] चिकीर्भ्याम् 3/2 ।

चिकीर्ष् + भ्याम् 3/2

चिकीर् + भ्याम्  8.2.24 रात् सस्य । (8.2.23 संयोगान्तस्य लोपः ।)

चिकीर्भ्याम्

[LSK] चिकीर्षु 7/3 ॥

चिकीर्ष् + सुप्

चिकीर् + सु  8.2.24 रात् सस्य । (8.2.23 संयोगान्तस्य लोपः ।)

8.3.15 खरवसानयोर्विसर्जनीयः । does not apply because of the नियम 8.3.16 रोः सुपि ।

चिकीर् + षु  8.3.59 आदेश-प्रत्यययोः । ~ इण्कोः सः मूर्धन्यः

चिकीर्षु [16]

Declension of चिकीर्ष् (ष्-पुं-5)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | चिकीः 6.1.68, 8.2.24, 8.3.15 | चिकीर्षौ | चिकीर्षः |
| S | same as above | same as above | same as above |
| 2 | चिकीर्षम् | same as above | same as above |
| 3 | चिकीर्षा | चिकीर्भ्याम् 8.2.24 | चिकीर्भिः 8.2.24 |
| 4 | चिकीर्षे | same as above | चिकीर्भ्यः 8.2.24 |
| 5 | चिकीर्षः | same as above | same as above |
| 6 | same as above | चिकीर्षोः | चिकीर्षाम् |
| 7 | चिकीर्षि | same as above | चिकीर्षु 8.2.24, 8.3.16, 8.3.59 |

[16] By 8.4.49 शरोऽचि ।, द्वित्व of ष् does not happen. (अचः 5/1 रहाभ्याम् 5/2 शरः 6/1 अचि 7/1 द्वे 1/2 न 0)

**<u>स्-कारान्त-पुँल्लिङ्गः (1) विद्वस्</u>**

विद्वस् (learned, wise)

विदँ ज्ञाने (2P) to know

विद् + लट् 3.2.123 वर्तमाने लट् ।

विद् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

विद् + वसुँ 7.1.36 विदेः शतुर्वसुः ।

विद्वस् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

उँ of वसुँ is इत्, thus विद्वस् is उगित्-प्रत्यय-अन्त-प्रातिपदिक.

[LSK] विद्वान्$^{1/1}$ ।

विद्वस् + सुँ

विद्वस् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

विद्वन्स् 7.1.70 उगिदचां सर्वनामस्थाने चाधातोः । ~ नुम्

विद्वान्स् 6.4.10 सान्तमहतः संयोगस्य । ~ न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने

विद्वान् 8.2.23 संयोगान्तस्य लोपः ।

[LSK] विद्वांसौ$^{1/2}$ ।

विद्वस् + औ

विद्वन्स् + औ 7.1.70 उगिदचां सर्वनामस्थाने चाधातोः । ~ नुम्

विद्वान्स् + औ 6.4.10 सान्तमहतः संयोगस्य । ~ न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने

विद्वांसौ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

[LSK] हे विद्वन्$^{S/1}$ ।

दीर्घ by 6.4.10 सान्तमहतः संयोगस्य । ~ न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने does not happen.

विद्वस् + सुँ

विद्वस् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

विद्वन्स् 7.1.70 उगिदचां सर्वनामस्थाने चाधातोः । ~ नुम्

विद्वन् 8.2.23 संयोगान्तस्य लोपः ।

## [विधिसूत्रम्] 6.4.131 वसोः सम्प्रसारणम् । ~ भस्य

For वसुँ-प्रत्यय-ending भ-संज्ञक-अङ्ग, there will be सम्प्रसारणम्.




वसोः 6/1 सम्प्रसारणम् 1/1 । ~ भस्य 6/1

2 words in the सूत्र; 1 word as अनुवृत्ति

- वसोः 6/1 – प्रातिपदिक is वसुँ; तदन्तविधि with भस्य, or प्रत्ययग्रहणे तदन्तग्रहण is applied, and it is understood as "वसुँ-ending भ".
- सम्प्रसारणम् 1/1 – By 1.1.45 इग्यणः संप्रसारणम् ।, यण् becoming इक् is called सम्प्रसारणम्.
- भस्य 6/1 – From अधिकारसूत्र 6.4.129 भस्य।; in स्थानेयोगा षष्ठी.

[LSK] वसुँ-अन्तस्य 6/1 भस्य 6/1 संप्रसारणम् 1/1 स्यात् 1/1 ।

संप्रसारण is the substitute for वसुँ-ending भ-संज्ञक-अङ्ग.

[LSK] विदुषः 2/3।

विद्वस् + शस्

विद् उ अस् + अस्     6.4.131 वसोः संप्रसारणम् । ~ भस्य

By 6.1.37 न सम्प्रसारणे सम्प्रसारणम् ।, it is understood that the last व् is to be modified.

विद् उस् + अस्     6.1.108 संप्रसारणाच्च । ~ अचि पूर्वः पूर्वपरयोः एकः संहितायाम्

विदुष् + अस्     8.3.59 आदेश-प्रत्यययोः । ~ इण्कोः सः मूर्धन्यः

The स् of विद्वस् is वसुँ-प्रत्यय-अवयव.

विदुषः     8.2.66, 8.3.15

[LSK] "वसुस्रंसु" (8.2.72) इति 0 विद्वद्भ्याम् 3/2॥

विद्वस् + भ्याम्

विद्वद् + भ्याम्     8.2.72 वसुस्रंसुध्वंस्वनडुहां दः । ~ सः पदानाम्

## Declension of विद्वस् (स-पुं-1)

### वसुँ-प्रत्यय-अन्त-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | विद्वस् + सुँ<br>विद्वस् 6.1.68<br>विद्वन्स् 7.1.70<br>विद्वान्स् 6.4.10<br>**विद्वान्** 8.2.23 | विद्वस् + औ<br>विद्वन्स् + औ 7.1.70<br>विद्वान्स् + औ 6.4.10<br>**विद्वांसौ** 8.3.24 | विद्वस् + जस्<br>विद्वन्स् + अस् 7.1.70<br>विद्वान्स् + अस् 6.4.10<br>विद्वांसस् 8.3.24<br>**विद्वांसः** 8.2.66, 8.3.15 |
| S | विद्वस् + सुँ<br>विद्वस् 6.1.68<br>विद्वन्स् 7.1.70<br>**विद्वन्** 8.2.23 | same as above | same as above |
| 2 | विद्वस् + अम्<br>विद्वन्स् + अम् 7.1.70<br>विद्वान्स् + अम् 6.4.10<br>**विद्वांसम्** 8.3.24 | same as above | विद्वस् + शस्<br>विद् उ अस् + अस् 6.4.131<br>विद् उस् + अस् 6.1.108<br>विदुष् + अस् 8.3.59<br>**विदुषः** 8.2.66, 8.3.15 |
| 3 | विद्वस् + टा<br>विद् उ अस् + आ 6.4.131<br>विद् उस् + आ 6.1.108<br>विदुष् + आ 8.3.59<br>**विदुषा** | विद्वस् + भ्याम्<br>विद्वद् + भ्याम् 8.2.72<br>**विद्वद्भ्याम्** | विद्वस् + भिस्<br>विद्वद् + भिस् 8.2.72<br>**विद्वद्भिः** 8.2.66, 8.3.15 |
| 4 | **विदुषे** | same as above | विद्वस् + भ्यस्<br>विद्वद् + भ्यस् 8.2.72<br>**विद्वद्भ्यः** 8.2.66, 8.3. 15 |
| 5 | **विदुषः** | same as above | same as above |
| 6 | **विदुषः** | **विदुषोः** | **विदुषाम्** |
| 7 | **विदुषि** | same as above | विद्वस् + सुप्<br>विद्वद् + सु 8.2.72<br>**विद्वत्सु** 8.4.55 |

## स्-कारान्त-पुँल्लिङ्गः (2) पुंस्

पुंस् (man) is derived with उणादि-प्रत्यय डुम्सुँन्. Thus this is उगित् प्रातिपदिक.

पा रक्षने (2P) to protect

पा + डुम्सुँन् (उ०) 4.179 पातेर्डुम्सुँन् ।

प् + उम्स् डित्वसामर्थ्याद् अभस्यापि टेर्लोपः ।

पुंस् नश्चापदान्तस्य झलि । ~ अनुस्वारः

पुंस् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

## [विधिसूत्रम्] 7.1.89 पुंसोऽसुङ् । ~ सर्वनामस्थाने

The last letter of पुंस् is replaced by असुङ् when सर्वनामस्थान is intended.




पुंसः $^{6/1}$ असुङ् $^{1/1}$ । ~ सर्वनामस्थाने $^{7/1}$

2 words in the सूत्र; 1 word as अनुवृत्ति

- पुंसः 6/1 – प्रातिपदिक is पुंस्; in स्थानेयोगा षष्ठी.
- असुङ् 1/1 – The content is अस्. The last ङ् is इत् and उ is for उच्चारण. By 1.1.53 ङिच्च । ~ अलः अन्त्यस्य, only the last letter is replaced.
- सर्वनामस्थाने 7/1 – From 7.1.86 इतोऽत् सर्वनामस्थाने ।. The 7th case is considered to be विषयसप्तमी. The meaning is सर्वनामस्थानविवक्षिते (when सर्वनामस्थान is intended). This operation is to be done before सुप्-उत्पत्ति, placing सुप्, in order to avoid certain स्वर rules.

[LSK] सर्वनामस्थाने $^{7/1}$ विवक्षिते $^{7/1}$ पुंसः $^{6/1}$ असुङ् $^{1/1}$ स्यात् $^{1/1}$ ।

असुङ् is the substitute for the last letter of पुंस् when सर्वनामस्थान is intended.

[LSK] पुमान्$^{1/1}$ ।

पुंस् (+ सुँ $^{1/1}$) सर्वनामस्थाने विवक्षिते -

पुं + असुँङ् 7.1.89 पुंसोऽसुङ् । ~ सर्वनामस्थाने with the help of 1.1.53 ङिच्च ।

पुम् + अस् (प०) निमित्तापाये नैमित्तिकस्याप्यपायः ।

पुमस्

पुमस् + सुँ $^{1/1}$

पुमस् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

पुमन्स् 7.1.70 उगिदचां सर्वनामस्थाने चाधातोः । ~ नुम्

पुमान्स् 6.4.10 सान्तमहतः संयोगस्य । ~ न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने

पुमान् 8.2.23 संयोगान्तस्य लोपः ।

[LSK] हे पुमन्$^{S/1}$ ।

दीर्घ by 6.4.10 सान्तमहतः संयोगस्य । ~ न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने does not happen.

[LSK] पुमांसौ $^{1/2}$ ।

पुंस् (+ औ)

पुं + असुँङ् 7.1.89 पुंसोऽसुङ् । ~ सर्वनामस्थाने with the help of 1.1.53 ङिच्च ।

पुम् + अस् (प०) निमित्तापाये नैमित्तिकस्याप्यपायः ।

पुमस्

पुमस् + औ $^{1/2}$

पुमन्स् + औ 7.1.70 उगिदचां सर्वनामस्थाने चाधातोः । ~ नुम्

पुमान्स् + औ 6.4.10 सान्तमहतः संयोगस्य । ~ न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने

पुमांसौ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

[LSK] पुम्भ्याम्$^{3/2}$ ।

पुंस् + भ्याम्

पुं + भ्याम् 8.2.23 संयोगान्तस्य लोपः ।

पुम् + भ्याम् (प०) निमित्तापाये नैमित्तिकस्याप्यपायः ।

[LSK] पुंसु$^{7/3}$॥

पुंस् + सुप्

पु + सु 8.2.23 संयोगान्तस्य लोपः ।

पुम् + सु (प०) निमित्तापाये नैमित्तिकस्याप्यपायः ।

पुं + सु 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

## Declension of पुंस् (स्-पुं-2)

When **सर्वनामस्थान** is intended:

पुं + असुँङ्  7.1.89

पुम् + अस्  (प०)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | पुमस् + सुँ<br>पुमस्  6.1.68<br>पुमन्स्  7.1.70<br>पुमान्स्  6.4.10<br>**पुमान्**  8.2.23 | पुमस् + औ<br>पुमन्स्+ औ  7.1.70<br>पुमान्स्+ औ  6.4.10<br>**पुमांसौ**  8.3.24 | पुमस् + जस्<br>पुमन्स्+ अस्  7.1.70<br>पुमान्स्+ अस्  6.4.10<br>पुमांसस्  8.3.24<br>**पुमांसः**  8.2.66, 8.3.15 |
| S | पुमस् + सुँ<br>पुमस्  6.1.68<br>पुमन्स्  7.1.70<br>**पुमन्**  8.2.23 | same as above | same as above |
| 2 | पुमस् + अम्<br>**पुमांसम्** 7.1.70, 6.4.10, 8.3.24 | same as above | पुंस् + शस्<br>**पुंसः**  8.2.66, 8.3.15 |
| 3 | पुंस् + टा<br>**पुंसा** | पुंस् + भ्याम्<br>पुं + भ्याम्  8.2.23<br>पुम् + भ्याम्  (प०)<br>पुं + भ्याम्  8.3.23<br>**पुम्भ्याम्/पुंभ्याम्** 8.4.59 | पुंस् + भिस्<br>पुं + भिस्  8.2.23<br>पुम् + भिस्  (प०)<br>पुं + भिस्  8.3.23<br>**पुम्भिः/पुंभिः** 8.2.66, 8.3.15, 8.4.59 |
| 4 | पुंस् + ङे<br>**पुंसे** | same as above | पुंस् + भ्यस्<br>पुं + भ्यस्  8.2.23<br>पुम् + भ्यस्  (प०)<br>पुं + भ्यस्  8.3.23<br>**पुम्भ्यः/पुंभ्यः** 8.2.66, 8.3.15, 8.4.59 |
| 5 | पुंस् + ङसिँ<br>**पुंसः**  8.2.66, 8.3.15 | same as above | same as above |
| 6 | पुंस् + ङस्<br>**पुंसः**  8.2.66, 8.3.15 | पुंस् + ओस्<br>**पुंसोः**  8.2.66, 8.3.15 | पुंस् +आम्<br>**पुंसाम्** |
| 7 | पुंस् + ङि<br>**पुंसि** | same as above | पुंस् + सुप्<br>पुं + सु  8.2.23<br>पुम् + सु  (प०)<br>**पुंसु**  8.3.23 |

## स्-कारान्त-पुँल्लिङ्गः (3) उशनस्

उशनस् (शुक्राचार्यः) is enumerated in 7.1.94 ऋदुशनस्पुरुदंसोऽनेहसां च । ~ अनङ् सौ असम्बुद्धौ.

Even though the अनङ्-आदेश does not take place when सम्बुद्धि सुँ follows, the next वार्तिक give some options.

वशँ कान्तौ (2P) to wish

वश् + कनसिँ (उ०) 4.240 वशेः कनसिँ । (वष्टि कामयते इति उशनाः, शुक्रः वारः वा ।

उ अश् + अनस् 6.1.16 ग्रहिज्याविवयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ।

उश् + अनस् 6.1.108 संप्रसारणाच्च । ~ पूर्वरूपम्

उशनस् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

When असम्बुद्धि सुँ follows, अनङ् (the content is अन्) is the substitute in the place of the last letter with the help of 1.1.53 ङिच्च । ~ अलः अन्त्यस्य.

[LSK] "ऋदुशन" (7.1.94) इति $^{0}$ अनङ् $^{1/1}$ । उशना $^{1/1}$ ।

उशनस् + सुँ

उशन अन् + स् 7.1.94 ऋदुशनस्पुरुदंसोऽनेहसां च । ~ अनङ् सौ असम्बुद्धौ

अशनन् + स् 6.1.97 अतो गुणे । ~ पररूपम्

उशनान् + स् 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ न उपधायाः दीर्घः

उशनान् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

उशना 8.2.7 नलोपः प्रातिपदिकान्तस्य । ~ पदस्य

[LSK] उशनसौ $^{1/2}$ ।

उशनस् + औ

उशनसौ

In सम्बुद्धि, there are three forms.

# (वार्तिकम्) अस्य सम्बुद्धौ वानङ्, नलोपश्च वा वाच्यः ।

For उशनस् in सम्बुद्धि, अनङ्-आदेश and नलोप are optional.

अस्य $^{6/1}$ सम्बुद्धौ $^{7/1}$ वा $^{0}$ अनङ् $^{1/1}$, नलोपः $^{1/1}$ च $^{0}$ वा $^{0}$ वाच्यः $^{1/1}$ ।

8 words in the वार्तिक, other words are understood by the context.

- अस्य 6/1 – उसनस्-शब्दस्य.
- सम्बुद्धौ 7/1 – प्रातिपदिक is सम्बुद्धि; in परसप्तमी.
- वा 0 – Optionally; qualifying अनङ्-आदेश.
- अनङ् 1/1 – अनङ्-आदेश given by 7.1.94 ऋदुशनस्पुरुदंसोऽनेहसां च । ~ अनङ् सौ असम्बुद्धौ.
- नलोपः 1/1 – लोप of न् of अनङ्. By 8.2.8 न ङिसम्बुद्ध्योः। नलोप is prohibited, but this वार्तिक makes it optional.
- च 0 – This connects अनङ् and नलोपः.
- वा 0 – Optionally; qualifying नलोपः.
- वाच्यः 1/1 – This has to be said.

Since there are two options, there must be three optional forms. One is with अनङ् and नलोप, the other is with अनङ् and without नलोप, and another is without अनङ् and नलोप.

[LSK] हे उशन $^{S/1}$ । This is with अनङ् and नलोप.

उशनस् + सुँ

उशन अन् + स्  (वा०) अस्य सम्बुद्धौ वानङ्, नलोपश्च वा वाच्यः । for 7.1.94 ऋदुशनस्पुरुदंसोऽनेहसां च ।

उशनन् + स्  6.1.97 अतो गुणे । ~ पररूपम्

6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ न उपधायाः दीर्घः is not applicable

उशनन्  6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

उशन  (वा०) अस्य सम्बुद्धौ वानङ्, नलोपश्च वा वाच्यः । instead of 8.2.8 न ङिसम्बुद्ध्योः ।

[LSK] हे उशनन् $^{S/1}$ । This is with अनङ् and without नलोप.

[LSK] हे उशनः $^{S/1}$ । This is without अनङ् and नलोप.

उशनस् + सुँ

उशनस्  6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

उशनः  8.2.66, 8.3.15

[LSK] हे उशनसौ S/2 ।

[LSK] उशनोभ्याम् 3/2 ।

उशनस् + भ्याम्

उशनरुँ + भ्याम्   8.2.66 ससजुषो रुः । ~ पदस्य

उशन उ + भ्याम्  6.1.114 हशि च । ~ अप्लुतात् अतः रोः उत्

उशनो + भ्याम्   6.1.87 आद्गुणः । ~ अचि एकः पूर्वपरयोः संहितायाम्

उशनोभ्याम्

The same operation as नमो नमः सन्धि.

[LSK] उशनस्सु 7/3, उशनःसु 7/3 ।

उशनस् + सुप्

उशनरुँ + सु   8.2.66 ससजुषो रुः । ~ पदस्य

उशनः + सु   8.3.16 रोः सुपि । (8.3.15 खरवसानयोर्विसर्जनीयः ।)

उशनस् + सु   8.3.36 वा शरि । ~ विसर्जनीयस्य सः

उशनस्सु/उशनःसु

## Declension of **उशनस्** (स्-पुं-3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | उशनस् + सुँ<br>उशान अन् + स् 7.1.94<br>अशनन् + स् 6.1.97<br>उशनान् + स् 6.4.8<br>उशनान् 6.1.68<br>**उशना** 8.2.7 | उशनस् + औ<br>**उशनसौ** | उशनस् + जस्<br>**उशनसः** 8.2.66, 8.3.15 |
| S | उशनस् + सुँ<br>उशन अन् + स् (वा०) अनङ्<br>उशनन् + स् 6.1.97<br>उशनन् 6.1.68<br>**उशन** (वा०) नलोपः<br>/**उशनन्** (वा०) नलोप-अभाव<br>/**उशनः** (वा०) अनङ्-अभाव | same as above | same as above |
| 2 | उशनस् + अम्<br>**उशनसम्** | same as above | same as above |
| 3 | उशनस् + टा<br>**उशनसा** | उशनस् + भ्याम्<br>उशनरुँ + भ्याम् 8.2.66<br>उशन उ + भ्याम् 6.1.114<br>**उशनोभ्याम्** 6.1.87 | उशनस् + भिस्<br>उशनरुँ + भिस् 8.2.66<br>उशन उ + भिस् 6.1.114<br>उशनो + भिस् 6.1.87<br>**उशनोभिः** 8.2.66, 8.3.15 |
| 4 | उशनस् + ङे<br>**उशनसे** | same as above | उशनस् + भ्यस्<br>उशनरुँ + भ्यस् 8.2.66<br>उशन उ + भ्यस् 6.1.114<br>उशनो + भ्यस् 6.1.87<br>**उशनोभिः** 8.2.66, 8.3.15 |
| 5 | उशनस् + ङसिँ<br>**उशनसः** 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | उशनस् + ओस्<br>**उशनसः** 8.2.66, 8.3.15 | उशनस् +आम्<br>**उशनसाम्** |
| 7 | उशनस् + ङि<br>**उशनसि** | same as above | उशनस् + सुप्<br>उशनरुँ + सु 8.2.66<br>उशनः + सु 8.3.16<br>उशनस् + सु 8.3.36<br>**उशनस्सु/उशनःसु** |

## स्-कारान्त-पुँल्लिङ्गः (4) अनेहस्

अनेहस् (time) is also enumerated in 7.1.94 ऋदुशनस्पुरुदंसोऽनेहसां च । ~ अनङ् सौ असम्बुद्धौ

The only difference in declension from उशनस् is in सम्बुद्धि. For the rest, it declines like उशनस्.

हनँ हिंसागत्योः (2P) to injure, to go

हन् + असिँ (उ०) 4.225 नञि हन एह च ।

एह् + अस् (उ०) 4.225 नञि हन एह च ।

नञ् + एह् + अस् (उ०) 4.225 नञि हन एह च ।

अ + एह् + अस् 6.3.73 नलोपो नञः ।

अ + न् + एह् + अस् 6.3.74 तस्मात् नुट् अचि । ~ नञः

अनेहस् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

When असम्बुद्धि सुँ follows, अनङ् (the content is अन्) is the substitute in the place of the last letter with the help of 1.1.53 ङिच्च । ~ अलः अन्त्यस्य.

[LSK] अनेहा 1/1 ।

अनेहस् + सुँ

अनेह अन् + स् 7.1.94 ऋदुशनस्पुरुदंसोऽनेहसां च । ~ अनङ् सौ असम्बुद्धौ

अनेहन् + स् 6.1.97 अतो गुणे । ~ पररूपम्

अनेहान् + स् 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ न उपधायाः दीर्घः

अनेहान् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

अनेहा 8.2.7 नलोपः प्रातिपदिकान्तस्य । ~ पदस्य

[LSK] अनेहसौ 1/2 ।

अनेहस् + औ

[LSK] हे अनेहः S/1 ।

अनेहस् + सुँ

अनेहस् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

अनेहः 8.2.66, 8.3.15

Declension of **अनेहस्** (स-पुं-4)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | अनेहस् + सुँ<br>अनेह अन् + स् 7.1.94<br>अनेहन् + स् 6.1.97<br>अनेहान् + स् 6.4.8<br>अनेहान् 6.1.68<br>**अनेहा** 8.2.7 | अनेहस् + औ<br>**अनेहसौ** | अनेहस् + जस्<br>**अनेहसः** 8.2.66, 8.3.15 |
| S | अनेहस् + सुँ<br>अनेहस् 6.1.68<br>**अनेहः** 8.2.66, 8.3.15 | same as above | same as above |
| 2 | अनेहस् + अम्<br>**अनेहसम्** | same as above | same as above |
| 3 | अनेहस् + टा<br>**अनेहसा** | अनेहस् + भ्याम्<br>अनेहरुँ + भ्याम् 8.2.66<br>अनेह उ + भ्याम् 6.1.114<br>**अनेहोभ्याम्** 6.1.87 | अनेहस् + भिस्<br>अनेहरुँ + भिस् 8.2.66<br>अनेह उ + भिस् 6.1.114<br>अनेहो + भिस् 6.1.87<br>**अनेहोभिः** 8.2.66, 8.3.15 |
| 4 | अनेहस् + ङे<br>**अनेहसे** | same as above | अनेहस् + भ्यस्<br>अनेहरुँ + भ्यस् 8.2.66<br>अनेह उ + भ्यस् 6.1.114<br>अनेहो + भ्यस् 6.1.87<br>**अनेहोभिः** 8.2.66, 8.3.15 |
| 5 | अनेहस् + ङसिँ<br>**अनेहसः** 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | अनेहस् + ओस्<br>**अनेहसः** 8.2.66, 8.3.15 | अनेहस् +आम्<br>**अनेहसाम्** |
| 7 | अनेहस् + ङि<br>**अनेहसि** | same as above | अनेहस् + सुप्<br>अनेहरुँ + सु 8.2.66<br>उशनः + सु 8.3.16<br>अनेहस् + सु 8.3.36<br>**अनेहस्सु/उशनःसु** |

It declines like **उशनस्**, except for S/1.

## स्-कारान्त-पुँल्लिङ्गः (5) वेधस्

वेधस् (ब्रह्मा जी) is a simple स्-ending प्रातिपदिक.

डुधाञ् धारणपोषणयोः (3U) to put

वि + धा + असिँ (उ०) 4.226 विधाञो वेध च ।

वेध् + अस् (उ०) 4.226 विधाञो वेध च ।

वेधस् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

उपधा-दीर्घ is seen in 1/1 only by 6.4.14 अत्वसन्तस्य चाधातोः ।.

[LSK] वेधाः $^{1/1}$ ।

वेधस् + सुँ $^{1/1}$

वेधस् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

वेधास् 6.4.14 अत्वसन्तस्य चाधातोः । ~ उपधायाः दीर्घः अङ्गस्य असम्बुद्धौ सौ

वेधारुँ 8.2.66 ससजुषो रुः ।

वेधाः 8.3.15 खरवसानयोर्विसर्जनीयः । ~ रः पदस्य

[LSK] वेधसौ $^{1/2}$ ।

वेधस् + औ

[LSK] हे वेधः $^{S/1}$ ।

वेधस् + सुँ

वेधस् 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

वेधः 8.2.66, 8.3.15

[LSK] वेधोभ्याम् $^{3/2}$ ॥

वेधस् + भ्याम्

वेधरुँ + भ्याम् 8.2.66 ससजुषो रुः ।

वेध उ + भ्याम् 6.1.114 हशि च । ~ अप्लुतात् अतः रोः उत्

वेधो+ भ्याम् 6.1.87 आद्गुणः । ~ अचि एकः पूर्वपरयोः संहितायाम्

वेधोभ्याम्

वेधस् + सुप् 7/3

वेधरुँ + सु 8.2.66 ससजुषो रुः ।

वेधः + सु 8.3.16 रोः सुपि । (8.3.15 खरवसानयोर्विसर्जनीयः ।)

वेधस् + सु 8.3.36 वा शरि । ~ विसर्जनीयस्य सः

Declension of वेधस् (स-पुं-5)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | वेधस् + सुँ<br>वेधस् 6.1.68<br>वेधास् 6.4.14<br>**वेधाः** 8.2.66, 8.3.15 | वेधस् + औ<br>**वेधसौ** | वेधस् + जस्<br>**वेधसः** 8.2.66, 8.3.15 |
| S | वेधस् + सुँ<br>वेधस् 6.1.68<br>**वेधः** 8.2.66, 8.3.15 | same as above | same as above |
| 2 | वेधस् + अम्<br>**वेधसम्** | same as above | same as above |
| 3 | वेधस् + टा<br>**वेधसा** | वेधस् + भ्याम्<br>वेधरुँ + भ्याम् 8.2.66<br>वेध उ + भ्याम् 6.1.114<br>**वेधोभ्याम्** 6.1.87 | वेधस् + भिस्<br>वेधरुँ + भिस् 8.2.66<br>वेध उ + भिस् 6.1.114<br>वेधो + भिस् 6.1.87<br>**वेधोभिः** 8.2.66, 8.3.15 |
| 4 | वेधस् + ङे<br>**वेधसे** | same as above | वेधस् + भ्यस्<br>वेधरुँ + भ्यस् 8.2.66<br>वेध उ + भ्यस् 6.1.114<br>वेधो + भ्यस् 6.1.87<br>**वेधोभिः** 8.2.66, 8.3.15 |
| 5 | वेधस् + ङसिँ<br>**वेधसः** 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | वेधस् + ओस्<br>**वेधसः** 8.2.66, 8.3.15 | वेधस् +आम्<br>**वेधसाम्** |
| 7 | वेधस् + ङि<br>**वेधसि** | same as above | वेधस् + सुप्<br>वेधरुँ + सु 8.2.66<br>वेधः + सु 8.3.16<br>**वेधस्सु/वेधःसु** 8.3.36 |

**<u>स्-कारान्त-पुँल्लिङ्गः (6) अदस्</u>**

अदस् (that) is सर्वनाम. Four new sūtras are to be studied with this.

The next sūtra gives अपवाद to अ-आदेश of 7.2.102 त्यदादीनामः। ~ विभक्तौ.

## [विधिसूत्रम्] 7.2.107 अदस औ सुलोपश्च । ~ सौ

When सुँ follows, the last letter of अदस् is replaced by औ and सुँ is elided.




अदसः $^{6/1}$ औ $^{1/1}$ सुलोपः $^{1/1}$ च $^{0}$ । ~ सौ $^{7/1}$

4 words in the सूत्र; 1 word as अनुवृत्ति

- अदसः 6/1 – In स्थानेयोगा षष्ठी.
- औ 1/1 – This is the first आदेश. The सुप्-प्रत्यय for 1/1 is लुप्त. 1.1.52 अलोऽन्त्यस्य। is required.
- सुलोपः 1/1 – This is the second आदेश. सोः लोपः सुलोपः (6T)। the elision of सुँ.
- च 0 – This shows that there are two कार्यs.
- सौ 7/1 – From 7.2.106 तदोः सः सावनन्त्ययोः ।; in परसप्तमी.

[LSK] अदसः $^{6/1}$ औ-कारः $^{1/1}$ अन्त-आदेशः $^{1/1}$ स्यात् $^{III/1}$ सौ $^{7/1}$ परे $^{7/1}$ सुलोपः $^{1/1}$ च $^{0}$ ।

औ is the substitute in the place of the last letter of अदस् when सुँ follows. There is also elision of सुँ.

[LSK] "तदोः" (7.2.106) इति $^{0}$ सः $^{1/1}$ । असौ $^{1/1}$ ।

अदस् + सुँ $^{1/1}$

| | |
|---|---|
| अद औ + स् | 7.2.102 त्यदादीनामः । is प्राप्ते, 7.2.107 अदस औ सुलोपश्च । ~ सौ |
| अद औ | 7.2.107 अदस औ सुलोपश्च । ~ सौ |
| अदौ | 6.1.88 वृद्धिरेचि । |
| असौ | 7.2.106 तदोः सः सावनन्त्ययोः । |

From 1/2 onward, 7.2.102 त्यदादीनामः । and other common sūtras are used.

[LSK] त्यदादि-अत्वम् 1/1 । पररूपत्वम् 1/1 । वृद्धिः 1/1 ।

अदस् + औ 1/2

अद् अ + औ 7.2.102 त्यदादीनामः । ~ विभक्तौ

अद + औ 6.1.97 अतो गुणे । ~ पररूपम्

अदौ 6.1.88 वृद्धिरेचि ।

Continue with the next sūtra…

## [विधिसूत्रम्] 8.2.80 अदसोऽसेर्दादु दो मः ।

अदस् which does not end with स् takes उ/ऊ for the letter after द्, and the द् is replaced by म्.




अदसः 6/1 असेः 6/1 दात् 5/1 उ 1/1 दः 6/1 मः 1/1 ।

6 words in the सूत्र, no word is required as अनुवृत्ति.

- अदसः 6/1 – The word अदस् in सम्बन्धषष्ठी to दात्.
- असेः 6/1 – This is adjective to अदसः . That which does not end with स्. न अस्ति सिः (= सकारः) यस्मि सः असिः (NB), तस्य । that in which there is no स्. This is to avoid नपुंसक.
- दात् 5/1 – द् in पूर्वपञ्चमी. The अ after द् is उच्चारणार्थ.
- उ 1/1 – उः च ऊः च उ (SD) । प्रातिपदिक is ऊ which becomes ह्रस्व by 1.2.47 ह्रस्वो नपुंसके प्रातिपदिकस्य। because समाहारद्वन्द्व is neuter by 2.4.17 स नपुंसकम् । ~ द्वन्द्वः. This is आदेश. स्थानिन् is the परस्य brought by परिभाषा for दात्. सुप् is लुप्त. For deciding उ or ऊ, प्रमाणतः (by the length) आन्तर्य of 1.1.50 स्थानेऽन्तरतमः । is used.
- दः 6/1 – प्रातिपदिक is द्; in स्थानेयोगा षष्ठी for म्-आदेश.
- मः 1/1 – This is आदेश. The अ after म् is उच्चारणार्थ.

[LSK] अदसः $^{6/1}$ असान्तस्य (NT) $^{6/1}$ दात् $^{5/1}$ परस्य $^{6/1}$ उद्-ऊतौ $^{1/2}$ स्तः $^{III/2}$ दस्य $^{6/1}$ मः $^{1/1}$ च $^{0}$ ।

उ/ऊ is the substitute for the letter after द् of अदस् which does not have स्. And also, द् is replaced by म्.

[LSK] आन्तरतम्यात् $^{5/1}$ (प्रमाणतः $^{0}$) ह्रस्वस्य $^{6/1}$ (स्थाने $^{7/1}$) उः $^{1/1}$ दीर्घस्य $^{6/1}$ (स्थाने $^{7/1}$) ऊः $^{1/1}$ ।

By being the most similar (आन्तरतम्यम्) of 1.1.50 स्थानेऽन्तरतमः ।, उ is the आदेश for ह्रस्व and ऊ for दीर्घ from the aspect of प्रमाणतः (by the length), one of the four similarities.

[LSK] अमू $^{1/2}$ ।

अदस् + औ

| | |
|---|---|
| अद् अ + औ | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| अद + औ | 6.1.97 अतो गुणे । ~ पररूपम् |
| अदौ | 6.1.88 वृद्धिरेचि । |
| अदू | 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः |

Since औ, the letter after द् is दीर्घ, the दीर्घ letter among उ and ऊ, which is ऊ, is taken as आदेश.

| | |
|---|---|
| अमू | 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य |

[LSK] जसः शी (7.1.17) । गुणः (6.1.87)॥

अदस् + जस् $^{1/3}$

| | |
|---|---|
| अद् अ + जस् | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| अद + जस् | 6.1.97 अतो गुणे । ~ पररूपम् |
| अद + शी | 7.1.17 जसः शी । ~ अतः सर्वनाम्नः |
| अदे | 6.1.87 आद्गुणः । |

Now, 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य is applicable. The next sūtra is the अपवाद.

## [विधिसूत्रम्] 8.2.81 एत ईद्बहुवचने । ~ अदसः दात् दः मः

In plural, ए after द् of अदस् takes ई, and the द् is replaced by म्.




एतः 6/1 ईत् 1/1 बहुवचने 7/1 । ~ अदसः 6/1 दात् 5/1 दः 6/1 मः 1/1

3 words in the सूत्र; 3 words as अनुवृत्ति

- एतः 6/1 – प्रातिपदिक is एत्; in स्थानेयोगा षष्ठी for ईत्-आदेश.
- ईत् 1/1 – This is आदेश. त् is just for clarity.
- बहुवचने 7/1 – In the sense of plural. This is not बहुवचन-संज्ञा in परसप्तमी because the ए of अदे in this stage is not followed by बहुवचन-संज्ञक-प्रत्यय.
- अदसः 6/1 – From the previous sūtra. The word अदस् in सम्बन्धषष्ठी to दात्.
- दात् 5/1 – From the previous sūtra. द् in पूर्वपञ्चमी. The अ after द् is उच्चारणार्थ.
- दः 6/1 – From the previous sūtra. Of द्. In स्थानेयोगा षष्ठी for म्-आदेश.
- मः 1/1 – From the previous sūtra. This is आदेश. The अ after म् is उच्चारणार्थ.

[LSK] अदसः 6/1 दात् 5/1 परस्य 6/1 ईत् 1/1 स्तः III/2 दस्य 6/1 च 0 मः 1/1 बहु-अर्थ-उक्तौ 7/1 ।

When plural is mentioned, ई is the substitute in the place of ए after द् of अदस्. And also, द् is replaced by म्.

[LSK] अमी 1/3 ।

अदस् + जस्

| | |
|---|---|
| अद अ + जस् | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| अद + जस् | 6.1.97 अतो गुणे । ~ पररूपम् |
| अद + शी | 7.1.17 जसः शी । ~ अतः सर्वनाम्नः |
| अदे | 6.1.87 आद्गुणः । |
| अदी | 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः |
| अमी | 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः |

[LSK] "पूर्वत्रासिद्धम्" (8.2.1) इति$^{0}$ विभक्ति-कार्यम्$^{1/1}$ प्राक्$^{0}$ पश्चात्$^{0}$ उत्व-मत्वे$^{1/2}$ ।

Because of 8.2.1 पूर्वत्रासिद्धम्।, the modifications caused by विभक्ति are to be done before, then substitutions of उ and म् are to be done later.

[LSK] अमुम्$^{2/1}$ ।

अदस् + अम्

अद् अ + अम्    7.2.102 त्यदादीनामः । ~ विभक्तौ

अद + अम्    6.1.97 अतो गुणे । ~ पररूपम्

अदम्    6.1.107 अमि पूर्वः । ~ अकः

अमम्    8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमुम्    8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

Here, there is a doubt: Does 8.2.1 पूर्वत्रासिद्धम् । give शास्त्र-असिद्धम् (सूत्र-असिद्धम्) or कार्य-असिद्धम्? The answer is शास्त्र-असिद्धम्.

If it were कार्य-असिद्धम्, sūtras in त्रिपादी would be effective. By 1.4.2 विप्रतिषेधे परं कार्यम्।, their कार्यs, substitutions of म् and उ, would be done first. Then, from the view of 6.1.107 अमि पूर्वः ।, म् and उ would be असिद्ध, but the स्थानिन्s, द् and अ, would also be gone. This situation is अनिष्ट. Thus 8.2.1 पूर्वत्रासिद्धम् । should be understood as शास्त्र-असिद्धम्.

[LSK] अमू$^{2/2}$ ।

[LSK] अमून्$^{2/3}$ ।

अदस् + शस्$^{2/3}$

अद् अ + अस्    7.2.102 त्यदादीनामः । ~ विभक्तौ

अद + अस्    6.1.97 अतो गुणे । ~ पररूपम्

अदास्    6.1.102 प्रथमयोः पूर्वसवर्णः । ~ दीर्घः

अदान्    6.1.103 तस्माच्छसो नः पुंसि ।

अमान्    8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमून्    8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

[LSK] मुत्वे $^{7/1}$ कृते $^{7/1}$ घिसंज्ञायाम् $^{7/1}$ ना-भावः $^{1/1}$ ॥

When म् and उ are done, घि-संज्ञा is gained for the अङ्ग, then ना-आदेश by 7.3.120 आङो नाऽस्त्रियाम् । will be there.

अदस् + टा $^{3/1}$

अद् अ + आ 7.2.102 त्यदादीनामः । ~ विभक्तौ

अद + आ 6.1.97 अतो गुणे । ~ पररूपम्

Now, 7.1.12 टाङसिङसां इनात्स्याः । is applicable because 8.2.80 अदसोऽसेर्दादु दो मः । is असिद्ध. This असिद्धत्व is negated by the next sūtra.

## [निषेधसूत्रम्] 8.2.3 न मु ने । ~ असिद्धः

When ना-आदेश is to be done, or has been done, त्रिपादी-कार्यs म् and उ are not असिद्ध.

न $^{0}$ मु $^{1/1}$ ने $^{7/1}$ । ~ असिद्धः $^{1/1}$

3 words in the सूत्र; 1 word as अनुवृत्ति

- न 0 – निषेध to असिद्धः.
- मु 1/1 – म् च उ च मु (SD)।; the substitutions which are म् and उ by 8.2.80 अदसोऽसेर्दादु दो मः।. The four members of इतरेतरद्वन्द्वसमास are connected to विधि in शेषे षष्ठी, by कर्म-अविवक्षितत्वात्.
- ने 7/1 – प्रातिपदिक is ना; in विषयसप्तमी. "When ना is to be done"
- असिद्धः 1/1 – From अधिकारसूत्र 8.2.1 पूर्वत्रासिद्धम् ।.

[LSK] ना-भावे $^{7/1}$ कर्तव्ये $^{7/1}$ कृते $^{7/1}$ च $^{0}$ मु-भावः $^{1/1}$ न $^{0}$ असिद्धः $^{1/1}$ ।

When the substitute of ना is required to be done, and also is already done, the substitutions which are म् and उ (by 8.2.80 अदसोऽसेर्दादु दो मः।) are not असिद्ध.

[LSK] अमुना $^{3/1}$ ।

अदस् + टा

अद् अ + आ 7.2.102 त्यदादीनामः । ~ विभक्तौ

अद + आ 6.1.97 अतो गुणे । ~ पररूपम्

अम + आ 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमु + आ 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

घि-संज्ञा 1.4.7 शेषो घ्यसखि । with the help of 8.2.3 न मु ने । ~ असिद्धम्

अमु + ना 7.3.120 आङो नाऽस्त्रियाम् । ~ घेः with the help of 8.2.3 न मु ने । ~ असिद्धम्

When घि-संज्ञा (1.4.7 शेषो घ्यसखि ।) and ना (7.3.120 आङो नाऽस्त्रियाम् ।) are कर्तव्ये, the negation of असिद्ध of मु (8.2.80 अदसोऽसेर्दादु दो मः।) is told. This is the example for "कर्तव्ये".

Also, when दीर्घ for अदन्त-अङ्ग is to be done by 7.3.102 सुपि च ।, the negation of असिद्ध of मु (8.2.80 अदसोऽसेर्दादु दो मः।) is told. This is the example for "कृते".

[LSK] अमूभ्याम् 3/2, 4/2, 5/2 ३ । The form "अमूभ्याम्" is repeated trice in 3/2, 4/2, and 5/2.

अदस् + भ्याम्

अद अ + भ्याम् 7.2.102 त्यदादीनामः ।

अद + भ्याम् 6.1.97 अतो गुणे । ~ पररूपम्

अदा + भ्याम् 7.3.102 सुपि च । ~ दीर्घः अतः

अमा+ भ्याम् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमू+ भ्याम् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

अमूभ्याम्

[LSK] अमीभिः 3/3 ।

अदस् + भिस्

अद अ + भिस् 7.2.102 त्यदादीनामः ।

अद + भिस् 6.1.97 अतो गुणे । ~ पररूपम्

ऐस् does not happen by 7.1.11 नेदमदसोरकोः । ~ अतः भिसः ऐस्

अदे + भिस् 7.3.103 बहुवचने झल्येत् । ~ सुपि अतः

अमे+ भिस् 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः

अमी+ भिस् 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः

अमीभिः 8.2.66, 8.3.15

[LSK] अमुष्मै 4/1 ।

अदस् + ङे

अद अ + ए 7.2.102 त्यदादीनामः ।

अद + अस् 6.1.97 अतो गुणे । ~ पररूपम्

अद + स्मै 7.1.14 सर्वनाम्नः स्मै । ~ अतः

अम + स्मै 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमु + स्मै 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

अमु + ष्मै 8.3.59 आदेशप्रत्यययोः ।

[LSK] अमीभ्यः $^{4/3, 5/3}$ २ । The form "अमीभ्यः" is repeated twice in 4/3 and 5/3.

अदस् + भ्यस्

अद् अ + भ्यस् 7.2.102 त्यदादीनामः ।

अद + भ्यस् 6.1.97 अतो गुणे । ~ पररूपम्

अदे + भ्यस् 7.3.103 बहुवचने झल्येत् । ~ सुपि अतः

अमे+ भ्यस् 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः

अमी+ भ्यस् 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः

अमीभ्यः 8.2.66, 8.3.15

[LSK] अमुष्मात् $^{5/1}$ ।

अदस् + ङसिँ

अद् अ + ङसिँ 7.2.102 त्यदादीनामः ।

अद + ङसिँ 6.1.97 अतो गुणे । ~ पररूपम्

अद + स्मात् 7.1.15 ङसिङ्योः स्मात्स्मिनौ । ~ अतः सर्वनाम्नः

अम + स्मात् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमु + स्मात् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

अमु + ष्मात् 8.3.59 आदेशप्रत्यययोः ।

[LSK] अमुष्य $^{6/1}$ ।

अदस् + ङस्

अद् अ + ङस् 7.2.102 त्यदादीनामः ।

अद + ङस् 6.1.97 अतो गुणे । ~ पररूपम्

अद + स्य 7.1.12 टाङसिङसां इनात्स्याः । ~ अतः

अम + स्य 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमु + स्य 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

अमु + ष्य 8.3.59 आदेशप्रत्यययोः ।

[LSK] अमुयोः $^{6/2, 7/2}$ २ । The form "अमुयोः" is repeated twice in 6/3 and 7/2.

अदस् + ओस्

अद् अ + ओस् 7.2.102 त्यदादीनामः ।

अद + ओस् 6.1.97 अतो गुणे । ~ पररूपम्

अदे + ओस् 7.3.104 ओसि च । ~ एत् अतः अङ्गस्य

अदय् + ओस् 6.1.78 एचोऽयवायावः। ~ अचि

अमयोस् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

अमुयोस् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य with the help of 1.1.50 स्थानेऽन्तरतमः । by प्रमाणतः

अमुयोः 8.2.66, 8.3.15

[LSK] अमीषाम्[6/3] ।

अदस् + आम्

अद अ + आम् 7.2.102 त्यदादीनामः ।

अद + आम् 6.1.97 अतो गुणे । ~ पररूपम्

अद + स् आम् 7.1.52 आमि सर्वनाम्नः सुट् । ~ आत्

अदे + साम् 7.3.103 बहुवचने झल्येत् । ~ सुपि अतः

अमे + साम् 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः

अमी + साम् 8.2.81 एत ईद्बहुवचने । ~ अदसः असेः दात् दः मः

अमी + षाम् 8.3.59 आदेशप्रत्यययोः ।

अमीषाम्

[LSK] अमुष्मिन्[7/1] ।

अदस् + ङि

अद अ + ङि 7.2.102 त्यदादीनामः ।

अद + ङि 6.1.97 अतो गुणे । ~ पररूपम्

अद + स्मिन् 7.1.15 ङसिङ्योः स्मात्स्मिनौ । ~ अतः सर्वनाम्नः

अम + स्मिन् 8.2.80 अदसोऽसेर्दादु दो मः । ~ पदस्य

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | किम् | के | कानि |
| S | | | |
| 2 | same as above | same as above | same as above |

The rest is like in पुंलिङ्ग.

## म-कारान्त-नपुंसकलिङ्गः (2) इदम्

[LSK] इदम्$^{1/1}$ ।

इदम् + सुँ

इदम् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

Note: 7.2.108 इदमो मः ~ विभक्तौ does not apply because of 1.1.63 न लुमताऽङ्गस्य । ~ प्रत्ययलोपे प्रत्ययलक्षणम्

[LSK] इमे$^{1/2}$।

इदम् + औ

इद अ + औ 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + औ 6.1.97 अतो गुणे ।

इद + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

इदे 6.1.87 आद्गुणः ।

इमे 7.2.109 दः च । ~ इदमः मः

[LSK] इमानि$^{1/3}$ ॥

इदम् + जस्

इद अ + जस् 7.2.102 त्यदादीनामः । ~ विभक्तौ

इद + जस् 6.1.97 अतो गुणे ।

इद + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

इद न् + इ 7.1.72 नपुंसकस्य झलचः । ~ नुम्

इदान् + इ 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ दीर्घः नोपधायाः

इमान् + ई 7.2.109 दः च । ~ इदमः मः

इमानि

Declension of इदम् (म्-न-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | इदम् | इमे | इमानि |
| S | | | |
| 2 | same as above | same as above | same as above |

The rest is like in पुंलिङ्ग.

The next वार्तिक is about 2.4.34 द्वितीयाटौस्स्वेनः । ~ इदमः एतदः अन्वादेशे.

# (वार्तिकम्) अन्वादेशे नपुंसके वा एनद् वक्तव्यः ।

It has to be said that एनद् is the substitute for इदम् and एतद् in अन्वादेश in neuter.

अन्वादेशे $^{7/1}$ नपुंसके $^{7/1}$ वा $^{0}$ एनद् $^{1/1}$ वक्तव्यः $^{1/1}$।

4 words in the वार्तिक, other words are understood by the context.

- अन्वादेशे 7/1 – In the sense of अन्वादेश, repeated mentioning; in विषयसप्तमी.
- नपुंसके 7/1 – In नपुंसक; in विषयसप्तमी.
- वा 0 – This word is found only in LSK of Gitapress. There seems to be no use for this word.
- एनद् 1/1 – This is आदेश. By 1.1.54 अनेकाल्शित्सर्वस्य।, the whole स्थानिन् is replaced.
  In भैमी, एनद्-आदेश is for all 6 places (2/1, 2/2, 2/3, 3/1, 6/2, 7/2), while in लघु-टिप्पणी, एनद्-आदेश is only for 2/1. In both cases, the result is the same because of 7.2.102 त्यदादीनामः ।.
- वक्तव्यः 1/1 – It should have been said, even though Pāṇini did not mention एनद्-आदेश.

[LSK] एनत् $^{2/1}$ ।

इदम् + अम्

| | |
|---|---|
| इदम् | 7.1.23 स्वमोर्नपुंसकस्य । ~ लुक् (अपवादः of 6.1.68) |
| एनद् | (वा०) अन्वादेशे नपुंसके वा एनद् वक्तव्यः । |

Note: 7.2.108 इदमो मः । ~ विभक्तौ does not apply because of 1.1.63 न लुमताऽङ्गस्य । ~ प्रत्ययलोपे प्रत्ययलक्षणम्

[LSK] एने $^{2/1}$ । एनानि $^{2/3}$ । एनेन $^{3/1}$ । एनयोः $^{6/2, 7/2}$ ॥

इदम् + औ $^{2/2}$

| | |
|---|---|
| इदम् + शी | 7.1.19 नपुंसकाच्च । ~ औङः शी |
| एनद् + ई | (वा०) अन्वादेशे नपुंसके वा एनद् वक्तव्यः । |
| एन अ + ई | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| एन + ई | 6.1.97 अतो गुणे । |
| एने | 6.1.87 आद्गुणः । |

**Declension of इदम् in अन्वादेश (म्-न-2)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | इदम् | इमे | इमानि |
| S | | | |
| 2 | एनत्/एनद् | एने | एनानि |
| 3 | एनेन | आभ्याम् | एभिः |
| 4 | अस्मै | same as above | एभ्यः |
| 5 | अस्मात् | same as above | same as above |
| 6 | अस्य | एनयोः | एषाम् |
| 7 | अस्मिन् | same as above | एषु |

The only difference from masculine is in 2/1, caused by the वार्तिकम्.

## न-कारान्त-नपुंसकलिङ्गः (1) अहन्

A sūtra related to अहन् (day) has been studied in विसर्गसन्धि section.

[LSK] अहः $^{1/1}$ ।

अहन् + सुँ $^{1/1}$

अहन् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

अहर् 8.2.69 रोऽसुपि । ~ अहन् [19]

अहः 8.3.15 खरवसानयोर्विसर्जनीयः । ~ रः पदस्य

[LSK] "विभाषा ङिश्योः" (6.4.136) अह्नी $^{1/2}$, अहनी $^{1/2}$ ।

In भ, 6.4.134 अल्लोपोऽनः । ~ भस्य is applicable. However, when ङि or शी follows, the लोप is optional. (Ref. हलन्तनपुंसक दधि)

अहन् + औ $^{1/2}$

अहन् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

अह् न् + ई 6.4.136 विभाषा ङिश्योः । ~ अत् लोपः अनः भस्य

अह्नी

लोप-अभाव-पक्षे

अहनी

[LSK] अहानि $^{1/3}$ ।

अहन् + जस् $^{1/3}$

अहन् + शि 7.1.20 जश्शसोः शिः । ~ नपुंसकात्

अहान् + इ 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ दीर्घः नोपधायाः

अहानि

अहन् + टा $^{3/1}$

अह् न् + आ 6.4.134 अल्लोपोऽनः । ~ भस्य

अह्ना

---

[19] 8.3.69 रोऽसुपि । रः $^{1/1}$ असुपि $^{7/1}$ – अह्नः $^{6/1}$ रेफादेशः $^{1/1}$ न $^{0}$ तु $^{0}$ सुपि $^{7/1}$ । अहरहः । अहर्गुणः ।

## [विधिसूत्रम्] 8.2.68 अहन् । ~ रुँः पदस्य अन्ते

The last letter of अहन् is replaced by रुँ at the end of पद.




अहन्[6/1] । ~ रुँः[1/1] पदस्य[6/1] अन्ते[7/1]

1 word in the सूत्र; 2 words as अनुवृत्ति

- अहन् 6/1 – In स्थानेयोगा षष्ठी; विभक्ति is लुप्त, elided.
- रुँ 1/1 – From 8.2.66 ससजुषो रुँः ।. This is आदेश.
- पदस्य 6/1 – From अधिकारसूत्र 8.1.16 पदस्य ।; सम्बन्धे षष्ठी to अन्ते.
- अन्ते 7/1 – From 8.2.29 स्कोः संयोगाद्योरन्ते च। (मण्डूकप्लुतगति); in अधिकरणे सप्तमी.

[LSK] "अहन्" इति[0] अस्य[6/1] रुँः[1/1] पदान्ते[7/1] ।

रुँ is the substitute in the place of the last letter of अहन् at the end of पद.

[LSK] अहोभ्याम्[3/2] ॥[20]

| | |
|---|---|
| अहन् + भ्याम् | |
| अह रुँ + भ्याम् | 8.2.68 अहन् । ~ रुँः पदस्य अन्ते with 1.1.52 अलोऽन्त्यस्य । |
| अह उ + भ्याम् | 6.1.114 हशि च । |
| अहोभ्याम् | 6.1.87 आद्गुणः । |

[20] 8.2.68 अहन् । ~ रुँः and 8.2.69 रोऽसुपि । are असिद्ध to 8.2.7 नलोपः प्रातिकदिकान्तस्य ।. This is avoided by repeating (आवृत्ति) the sūtra "अहन्" twice. The first "अहन्" is to negate नलोप (नलोप-अभावं निपात्य), and the second "अहन्" is to give रुँ-आदेश (रुँ-विधेयः) [SK]

अहन् + सुप्[7/3]

अह रुँ + सु 8.2.68 अहन्। ~ रुँ: पदस्य अन्ते

अहः + सु 8.3.15 खरवसानयोर्विसर्जनीयः । ~ रः पदस्य

अहः + सु 8.3.36 वा शरि । ~ विसर्जनीयस्य विसर्जनीयः

पक्षे

अहः + सु 8.3.34 विसर्जनीयस्य सः ।

Declension of अहन् (न्-न-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | अहः 7.1.23, 8.2.69, 8.3.15 | अह्नी/अहनी 7.1.19, 6.4.136 | अहानि 7.1.20, 6.4.8 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | अह्ना 6.4.134 | अहोभ्याम् 8.2.68, 6.1.114, 6.1.87 | अहोभिः 8.2.68, 6.1.114, 6.1.87 |
| 4 | अह्ने 6.4.134 | same as above | अहोभ्यः 8.2.68, 6.1.114, 6.1.87 |
| 5 | अह्नः 6.4.134 | same as above | same as above |
| 6 | same as above | अह्नोः 6.4.134 | अह्नाम् 6.4.134 |
| 7 | अह्नि/अहनि 6.4.136 | same as above | अहःसु/अहस्सु 8.2.68, 8.3.15, 8.3.36/8.3.34 |

## न-कारान्त-नपुंसकलिङ्गः (2) दण्डिन्

दण्डिन् (one who has a stick, कुलम्) is इन्-प्रत्यय ending word.

दण्डः अस्य अस्ति इति दण्डि, कुलम् ।

दण्ड + सु + इनिँ 5.2.115 अत इनिँठनौ ।

1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

दण्ड + इन् 2.4.71 सुपो धातुप्रातिपदिकयोः । ~ लुक्

दण्ड् + इन् 6.4.148 यस्येति च । ~ लोपः भस्य

दण्डिन्

[LSK] दण्डि 1/1 ।

दण्डिन् + सुँ

दण्डिन् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

दण्डि 8.2.7 नलोपः प्रातिपदिकान्तस्य ।

दण्डिन् + सुँ S/1

दण्डिन् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

दण्डि (वा०) सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः । for 8.2.8 न ङिसम्बुद्ध्योः । ~ नलोपः प्रातिपदिकान्तस्य

दण्डिन् पक्षे

[LSK] दण्डिनी 1/2।

दण्डिन् + औ

दण्डिन् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

दण्डिन् + ई

दण्डिनी

[LSK] दण्डीनि 1/3।

दण्डिन् + जस्

दण्डिन् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

दण्डीन् + इ 6.4.12 इन्हन्पूषार्यम्णां शौ । ~ उपधायाः दीर्घः अङ्गानाम् (नियमसूत्रम् to 6.4.8 सर्वनामस्थाने...।)

दण्डीनि

[LSK] दण्डिना [3/1] ।

दण्डिन् + टा

दण्डिन् + आ

[LSK] दण्डिभ्याम् [3/2] ॥

दण्डिन् + भ्याम्

दण्डि + भ्याम्    8.2.7 नलोपः प्रातिपदिकान्तस्य ।

Declension of दण्डिन् (न्-न-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | दण्डि 7.1.23, 8.2.7 | दण्डिनी 7.1.19 | दण्डीनि 7.1.20, 6.4.8 |
| S | दण्डि/दण्डिन् 7.1.23, (वा०) 8.2.8 | same as above | same as above |
| 2 | दण्डि 7.1.23, 8.2.7 | same as above | same as above |
| 3 | दण्डिना | दण्डिभ्याम् 8.2.7 | दण्डिभिः 8.2.7 |
| 4 | दण्डिने | same as above | दण्डिभ्यः 8.2.7 |
| 5 | दण्डिनः | same as above | same as above |
| 6 | same as above | दण्डिनोः | दण्डिनाम् |
| 7 | दण्डिनि | same as above | दण्डिषु |

In the same manner, स्रग्विन् [21], वाग्मिन्, बहुवृत्रहन्, etc;

[21] Q: Because of अर्थवद्-ग्रहणे नानर्थकस्य ग्रहणम्॥ प० 14॥ the इन् in the sūtra 6.4.12 इन्हन्पूषार्यम्णां शौ । does not indicate the विनिँ?

A: No. Because of अन्-इन्-अस्-मन्-ग्रहणानि अर्थवता चानर्थकेन च तदन्तविधिं बोधयन्ति ॥ प० 16॥, the इन् in the sūtra indicates the विनिँ also.

## <u>न-कारान्त-नपुंसकलिङ्गः (3) सुपथिन्</u>

सुपथिन् (in which there are good roads, नगरम्) is पथिन् ending word.

सुपथिन् (in which there are good roads, नगरम्)

शोभनाः पन्थानः यस्मिन् तत् सुपथि, नगरम्

सु + सुँ + पथिन् + सुँ 2.2.24 अनेकमन्यपदार्थे । ~ बहुव्रीहिः समासः

प्रातिपदिक-संज्ञा by 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

सु + पथिन् 2.4.71 सुपो धातुप्रातिपदिकयोः । ~ लुक्

सुपथिन्

[LSK] सुपथि $^{1/1}$ ।

सुपथिन् + सुँ

सुपथिन् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

सुपथि 8.2.7 नलोपः प्रातिपदिकान्तस्य ।

सुपथिन् + सुँ $^{S/1}$

सुपथिन् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

सुपथि (वा०) सम्बुद्धौ सपुंसकानां नलोपो वा वाच्यः । for 8.2.8 न ङिसम्बुध्योः । ~ नलोपः प्रातिपदिकान्तस्य

सुपथिन् पक्षे

[LSK] टेर्लोपः (7.1.88) । सुपथी $^{1/2}$।

सुपथिन् + औ

सुपथिन् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

सुपथ् + ई 7.1.88 भस्य टेर्लोपः । ~ पथिमथ्यृभुक्षामात्

सुपथी

[LSK] सुपन्थानि $^{1/3}$।

सुपथिन् + जस्

सुपथिन् + शि 7.1.20 जश्शसोः शिः । ~ नपुंसकात्

सुपथन् + इ 7.1.86 इतोऽत्सर्वनामस्थाने । ~ पथिमथ्यृभुक्षामात्

सुपन्थन् + इ 7.1.87 थोऽन्थः । ~ पथिमथ्यृभुक्षामात् सर्वनामस्थाने

सुपन्थान् + इ 6.4.8 सर्वनामस्थाने चासम्बुद्धौ । ~ नोपधायाः दीर्घः

सुपन्थानि

Declension of सुपथिन् (न्-न-3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | सुपथि 7.1.23, 8.2.7 | सुपथी 7.1.19, 7.1.88 | सुपन्थानि 7.1.20, 7.1.86, 7.1.87, 6.4.8 |
| S | हे सुपथि /सुपथिन् 7.1.23, (वा०) 8.2.8 | same as above | same as above |
| 2 | सुपथि 7.1.23, 8.2.7 | same as above | same as above |
| 3 | सुपथा | सुपथिभ्याम् 8.2.7 | सुपथिभिः 8.2.7 |
| 4 | सुपथे | same as above | सुपथिभ्यः 8.2.7 |
| 5 | सुपथः | same as above | same as above |
| 6 | same as above | सुपथोः | सुपथाम् |
| 7 | सुपथि | same as above | सुपथिषु 8.2.7 |

## <u>ज्-कारान्त-नपुंसकलिङ्गः (1) ऊर्ज्</u>

ऊर्ज् (strength, brightness)

ऊर्जँ बलप्राणनयोः (10U) to strengthen, to live

ऊर्ज् + क्विप् 3.2.76 क्विप् च ।

प्रातिपदिक-संज्ञा by 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] ऊर्क् 1/1, ऊर्ग् 1/1 ।

ऊर्ज् + सुँ

ऊर्ज् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

ऊर्ग् 8.2.30 चोः कुः ।

ऊर्क् 8.4.56 वावसाने ।

Note: 8.2.23 संयोगान्तस्य लोपः । does not apply because of the नियमसूत्रम् 8.2.24 रात् सस्य ।. This नियमसूत्रम् is meant only for this word.

[LSK] ऊर्जी 1/2 ।

ऊर्ज् + औ

ऊर्ज् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

ऊर्ज् + ई

ऊर्जी

[LSK] ऊर्न्जि 1/3 । नरजानाम् 6/3 संयोगः 1/1 ।

The conjunct consonants of न्, र्, and ज् in 1/3.

ऊर्ज् + जस्

ऊर्ज् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

ऊ न् र्ज् + इ 7.1.72 नपुंसकस्य झलचः । ~ नुम्

ऊर्न्जि

Declension of ऊर्ज् (ज्-न-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | ऊर्क्/ऊर्ग् 7.1.23, 8.2.30, 8.4.56 | ऊर्जी 7.1.19 | ऊर्न्जि 7.1.20, 7.1.72 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | ऊर्जा | ऊर्ग्भ्याम् 8.2.30 | ऊर्ग्भिः 8.2.30 |
| 4 | ऊर्जे | same as above | ऊर्ग्भ्यः 8.2.30 |
| 5 | ऊर्जः | same as above | same as above |
| 6 | same as above | ऊर्जोः | ऊर्जाम् |
| 7 | ऊर्जि | same as above | ऊर्क्षु 8.2.30, 8.3.59, 8.4.55 |

## द-कारान्त-नपुंसकलिङ्गः (1) तद्

[LSK] तत्[1/1] ।

तद् + सुँ

तद् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

Note: 7.2.106 तदोः सः सावनन्त्ययोः । ~ विभक्तौ does not apply because of 1.1.63 न लुमताऽङ्गस्य । ~ प्रत्ययलोपे प्रत्ययलक्षणम्

तत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

[LSK] ते[1/2] ।

तद् + औ

त + अ + औ 7.2.102 त्यदादीनामः । ~ विभक्तौ

त + औ 6.1.97 अतो गुणे ।

त + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

ते 6.1.87 आद्गुणः ।

[LSK] तानि[1/3] ।

तद् + जस्

त + अ + जस् 7.2.102 त्यदादीनामः । ~ विभक्तौ

त + जस् 6.1.97 अतो गुणे ।

त + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

त न् + इ 7.1.72 नपुंसकस्य झलचः । ~ नुम्

ता न् + इ 6.4.8 सर्वनामस्थाने चासम्बुद्धौ ।

तानि

Declension of तद् (द्-न-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | तत्/तद् 7.1.23, 8.456 | ते 7.2.102, 6.1.97, 7.1.19, 6.1.87 | तानि 7.2.102, 6.1.97, 7.1.20, 7.1.72, 6.4.8 |
| S | | | |
| 2 | same as above | same as above | same as above |

The rest is like in पुंलिङ्ग.

## द-कारान्त-नपुंसकलिङ्गः (2) यद्

[LSK] यत्[1/1] ।

यद् + सुँ

यद् 7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

Note: 7.2.102 त्यदादीनामः । ~ विभक्तौ does not apply because of 1.1.63 न लुमताऽङ्गस्य । ~ प्रत्ययलोपे प्रत्ययलक्षणम्

यत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

[LSK] ये[1/2] । यानि[1/3] ।

The rest is the same as for तद्.

Declension of यद् (द्-न-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | यत्/यद् 7.1.23, 8.456 | ये 7.2.102, 6.1.97, 7.1.19, 6.1.87 | यानि 7.2.102, 6.1.97, 7.1.20, 7.1.72, 6.4.8 |
| S | | | |
| 2 | same as above | same as above | same as above |

The rest is like in पुंलिङ्ग.

## द-कारान्त-नपुंसकलिङ्गः (3) एतद्

[LSK] एतत्[1/1] ।

एतद् + सुँ

एतद्　　7.1.23 स्वमोर्नपुंसकात् । ~ लुक्

Note: 7.2.106 तदोः सः सावनन्त्ययोः । ~ विभक्तौ does not apply because of 1.1.63 न लुमताऽङ्गस्य । ~ प्रत्ययलोपे प्रत्ययलक्षणम्

एतत्　　8.4.56 वाऽवसाने । ~ झलाम् चर्

[LSK] एते[1/2] । एतानि[1/3] ।

The rest is the same as for एतद्.

Declension of एतद् (द्-न-3)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | एतत्/एतद् 7.1.23, 8.456 | एते 7.2.102, 6.1.97, 7.1.19, 6.1.87 | एतानि 7.2.102, 6.1.97, 7.1.20, 7.1.72, 6.4.8 |
| S | | | |
| 2 | same as above | same as above | same as above |

The rest is like in पुंलिङ्ग.

Declension of इदम् in अन्वादेश (म्-न-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | एतत्/एतद् | एते | एतानि |
| S | | | |
| 2 | एनत्/एनद् | एने | एनानि |
| 3 | एनेन | एताभ्याम् | एतैः |
| 4 | एतस्मै | same as above | एतेभ्यः |
| 5 | एतस्मात् | same as above | same as above |
| 6 | एतस्य | एनयोः | एतेषाम् |
| 7 | एतस्मिन् | same as above | एतेषु |

The only difference from masculine is in 2/1, caused by the वार्तिकम्.

## <u>च-कारान्त-नपुंसकलिङ्गः (1) गो + अच् (गत्यर्थे अञ्चु)</u>

गो अच् (one who goes after cows, कुलम्) is गो-उपपद-गति-अर्थ-अञ्चु-धातु with क्विन्-प्रत्यय.

गाम् अञ्चति इति

गो + अम् + अञ्चु + क्विन् 3.2.59 ऋत्विग्दधृक्स्रग्दिगुष्णिग् अञ्चुयुजिक्रुञ्चां च । ~ क्विन्

गो + अच् 6.4.24 अनिदितां हल उपधायाः क्ङिति ।

[LSK] गवाक्[1/1] ।

गो अच् + सुँ

गो अच् 7.1.23 स्वमोर्नपुंसकात्। ~ लुक्

गो अक् 8.2.30 चोः कुः । ~ झलि पदस्य अन्ते च

गो अग् 8.2.39 झलां जशोऽन्ते ।

गो अक् 8.4.56 वाऽवसाने । ~ झलाम् चर्

ग् अव अक्/ग् 6.1.123 अवङ् स्फोटायनस्य ।

<u>गवाक्/गवाग्</u>

<u>गोअक्/गोअग्</u> 6.1.122 सर्वत्र विभाषा गोः । ~ प्रकृत्या

<u>गोऽक्/गोऽग्</u> 6.1.109 एङः पदान्तादति । ~ पूर्वः

[LSK] गोची[1/2] ।

गो अच् + औ

गो अच् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

गो च् + ई 6.4.138 अचः । ~ अत् लोपः भस्य

गोची

[LSK] गवाञ्चि[1/3] ।

गो अच् + जस्

गो अच् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

गो अ न् च् + इ 7.1.70 उगिदचां सर्वनामस्थाने चासम्बुद्धौ ।

Being नलोपी अञ्चुधातु, नुम्-आगम is given.

गो अंच् + इ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

गो अञ्च् + इ 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

गवाञ्चि 6.1.123 अवङ् स्फोटायनस्य ।

गोअञ्चि 6.1.122 सर्वत्र विभाषा गोः ।

गोऽञ्चि 6.1.109 एङः पदान्तादति ।

[LSK] पुनः [0] तद्वत् [0] ।

[LSK] गोचा [3/1] ।

गो अच् + टा

गो च् + आ 6.4.138 अचः । ~ अत् लोपः भस्य

गोचा

In the same manner with अजादि-suffix.

[LSK] गवाग्भ्याम् [3/2] ।

गो अच् + भ्याम् [3/2]

गो अज् + भ्याम् 8.2.39 झलां जशोऽन्ते ।

गो अग् + भ्याम् 8.2.62 क्विन्प्रत्ययस्य कुः ।

गवाग्भ्याम् 6.1.123 अवङ् स्फोटायनस्य ।

गोअग्भ्याम् 6.1.122 सर्वत्र विभाषा गोः ।

गोऽग्भ्याम् 6.1.109 एङः पदान्तादति ।

गो अच् + सुप् [7/3]

गो अज् + सु 8.2.39 झलां जशोऽन्ते ।

गो अग् + सु 8.2.62 क्विन्प्रत्ययस्य कुः ।

गो अग् + षु 8.3.59 आदेशप्रत्यययोः ।

गो अक् + षु 8.4.55 खरि च । ~ झलां चर्

गवाक्षु 6.1.123 अवङ् स्फोटायनस्य ।

गोअक्षु 6.1.122 सर्वत्र विभाषा गोः ।

गोऽक्षु 6.1.109 एङः पदान्तादति ।

Declension of गो + अच् (च्-न-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | गवाक्/गवाग्<br>गोअक्/गोअग्<br>गोऽक्/गोऽग् | गोची | गवाञ्चि<br>गोअञ्चि<br>गोऽञ्चि |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | गोचा | गवाग्भ्याम्<br>गोअग्भ्याम्<br>गोऽग्भ्याम् | गवाग्भिः<br>गोअग्भिः<br>गोऽग्भिः |
| 4 | गोचे | same as above | गवाग्भ्यः<br>गोअग्भ्यः<br>गोऽग्भ्यः |
| 5 | गोचः | same as above | same as above |
| 6 | same as above | गोचोः | गोचाम् |
| 7 | गोचि | same as above | गवाक्षु<br>गोअक्षु<br>गोऽक्षु |

Summary:

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| 1 | 6 | 1 | 3 | 10 |
| S | 6 | 1 | 3 | 10 |
| 2 | 6 | 1 | 3 | 10 |
| 3 | 1 | 3 | 3 | 7 |
| 4 | 1 | 3 | 3 | 7 |
| 5 | 1 | 3 | 3 | 7 |
| 6 | 1 | 1 | 1 | 3 |
| 7 | 1 | 1 | 3 | 5 |
| | | | | 59 |

In 1/1, S/1, 2/1 :

By 3 options of अच्-सन्धि and 2 options at the end, there are 6 forms.

In भ section:

There is only one form.

In other section:

There are 3 forms by 3 options of अच्-सन्धि.

## <u>च-कारान्त-नपुंसकलिङ्गः (2) गो + अच् (पूजार्थे अञ्च्)</u>

गो अञ्च् (one who worships cows, कुलम्) is गो-उपपद-पूजा-अर्थ-अञ्च्-धातु with क्विन्-प्रत्यय.

गाम् अञ्चति इति

गो + अम् + अञ्च् + क्विन् 3.2.59 ऋत्विग्दधृक्स्रग्दिगुष्णिग् अञ्चुयुजिक्रुञ्चां च । ~ क्विन्

गो + अञ्च् 6.4.30 नाञ्चेः पूजायाम् । अनिदितां हल उपधायाः क्ङिति

गो अञ्च् + सुँ 1/1

गो अञ्च् 7.1.23 स्वमोर्नपुंसकस्य । ~ लुक् (अपवादः of 6.1.68)

गो अन् 8.2.23 संयोगान्तस्य लोपः ।, निमित्तापाये नैमित्तिकस्याप्यपायः ।

गो अङ् 8.2.62 क्विन्प्रत्ययस्य कुः ।

ग् अव अङ् 6.1.123 अवङ् स्फोटायनस्य ।

<u>गवाङ्</u>

<u>गोअङ्</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽङ्</u> 6.1.109 एङः पदान्तादति ।

गो अञ्च् + औ 1/2

गो अञ्च् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

<u>गवाञ्ची</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअञ्ची</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽञ्ची</u> 6.1.109 एङः पदान्तादति ।

गो अञ्च् + जस् 1/3

गो अञ्च् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

<u>गवाञ्चि</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअञ्चि</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽञ्चि</u> 6.1.109 एङः पदान्तादति ।

Note: Because of the sentence (from where?) अचः परस्यैव झलो नुम्विधानम् ।

गो अञ्च् + टा [3/1]

<u>गवाञ्चा</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअञ्चा</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽञ्चा</u> 6.1.109 एङः पदान्तादति ।

In the same manner with अजादि-suffix.

गो अञ्च् + भ्याम् [3/2]

गो अन् + भ्याम् 8.2.23 संयोगान्तस्य लोपः ।, निमित्तापाये नैमित्तिकस्याप्यपायः ।

गो अङ् + भ्याम् 8.2.62 क्विन्प्रत्ययस्य कुः ।

<u>गवाङ्भ्याम्</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअङ्भ्याम्</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽङ्भ्याम्</u> 6.1.109 एङः पदान्तादति ।

गो अञ्च् + सुप् [7/3]

गो अन् + सु 8.2.23 संयोगान्तस्य लोपः ।, निमित्तापाये नैमित्तिकस्याप्यपायः ।

गो अङ् + सु 8.2.62 क्विन्प्रत्ययस्य कुः ।

गो अङ् + षु 8.3.59 आदेशप्रत्यययोः ।

<u>गवाङ्षु</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअङ्षु</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽङ्षु</u> 6.1.109 एङः पदान्तादति ।

गो अङ् + सु 8.2.62 क्विन्प्रत्ययस्य कुः ।

गो अङ् क् + सु 8.3.28 ङ्णोः कुक्टुक् शरि । ~ वा

गो अङ् क् + षु 8.3.59 आदेशप्रत्यययोः ।

<u>गवाङ्क्षु</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअङ्क्षु</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽङ्क्षु</u> 6.1.109 एङः पदान्तादति ।

गो अङ् क् + सु 8.3.28 ङ्णोः कुक्टुक् शरि । ~ वा

गो अङ् ख् + सु (वा०) चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् ।

गो अङ् ख् + षु 8.3.59 आदेशप्रत्यययोः ।

<u>गवाङ्खषु</u> 6.1.123 अवङ् स्फोटायनस्य ।

<u>गोअङ्खषु</u> 6.1.122 सर्वत्र विभाषा गोः ।

<u>गोऽङ्खषु</u> 6.1.109 एङः पदान्तादति ।

Declension of गो + अच् (च्-न-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | गवाङ् 6.1.123<br>गोअङ् 6.1.122<br>गोऽङ् 6.1.109 | गवाञ्ची 6.1.123<br>गोअञ्ची 6.1.122<br>गोऽञ्ची 6.1.109 | गवाञ्चि 6.1.123<br>गोअञ्चि 6.1.122<br>गोऽञ्चि 6.1.109 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | गवाञ्चा 6.1.123<br>गोअञ्चा 6.1.122<br>गोऽञ्चा 6.1.109 | गवाङ्भ्याम् 6.1.123<br>गोअङ्भ्याम् 6.1.122<br>गोऽङ्भ्याम् 6.1.109 | गवाङ्भिः 6.1.123<br>गोअङ्भिः 6.1.122<br>गोऽङ्भिः 6.1.109 |
| 4 | गवाञ्चे 6.1.123<br>गोअञ्चे 6.1.122<br>गोऽञ्चे 6.1.109 | same as above | गवाङ्भ्यः 6.1.123<br>गोअङ्भ्यः 6.1.122<br>गोऽङ्भ्यः 6.1.109 |
| 5 | गवाञ्चः 6.1.123<br>गोअञ्चः 6.1.122<br>गोऽञ्चः 6.1.109 | same as above | same as above |
| 6 | same as above | गवाञ्चोः 6.1.123<br>गोअञ्चोः 6.1.122<br>गोऽञ्चोः 6.1.109 | गवाञ्चाम् 6.1.123<br>गोअञ्चाम् 6.1.122<br>गोऽञ्चाम् 6.1.109 |
| 7 | गवाञ्चि 6.1.123<br>गोअञ्चि 6.1.122<br>गोऽञ्चि 6.1.109 | same as above | गवाङ्षु/गवाङ्क्षु/गवाङ्खषु 6.1.123<br>गोअङ्षु/गोअङ्क्षु/गोअङ्खषु 6.1.122<br>गोऽङ्षु/गोऽङ्क्षु/गोऽङ्खषु 6.1.109 |

Summary:

| | एकवचनम् | द्विवचनम् | बहुवचनम् | |
|---|---|---|---|---|
| 1 | 3 | 3 | 3 | 9 |
| S | 3 | 3 | 3 | 9 |
| 2 | 3 | 3 | 3 | 9 |
| 3 | 3 | 3 | 3 | 9 |
| 4 | 3 | 3 | 3 | 9 |
| 5 | 3 | 3 | 3 | 9 |
| 6 | 3 | 3 | 3 | 9 |
| 7 | 3 | 3 | 9 | 15 |
| | | | | 78 |

In 1/1, S/1, 2/1 :

By 3 options of अच्-सन्धि and 2 options at the end, there are 6 forms.

In भ section:

There is only one form.

In other section:

There are 3 forms by 3 options of अच्-सन्धि.

How many declined forms of गो + अञ्च् + क्विन् are there all together?

गत्यर्थे 59

पूजार्थे 78

= 137

However, it is said to be 109 forms. How?

गत्यर्थे 59 (सम्बोधने -10) = 49

पूजार्थे 78 (सम्बोधने -9) = 69 (जसि शसि समानरूपाणि -6) (सुपि वार्तिककारपक्षे -3) = 60

= 109

Forms in सम्बोधन are not counted. Since forms are the same, 6 forms in 1/3 and 2/3 are not counted twice. In 7/3 of पूजार्थ, forms with ख् by (वा०) चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् । is not according to सूत्रकार, thus 3 forms are deducted. Then total number should be 109.

## त-कारान्त-नपुंसकलिङ्गः (1) शकृत्

शकृत् (पुरीषः)

[LSK] शकृत्$^{1/1}$ ।

शकृत् + सुँ

शकृत् 7.1.23 स्वमोर्नपुंसकात्। ~ लुक्

शकृद् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

शकृत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

[LSK] शकृती$^{1/2}$ ।

शकृत् + औ

शकृत् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

शकृती

[LSK] शकृन्ति$^{1/3}$ ।

शकृत् + जस्

शकृत् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

शकृ न् त् + इ 7.1.72 नपुंसकस्य झलचः । ~ नुम्

शकृंत् + इ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

शकृन्त् + इ 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

Note: णत्व cannot take place because the न् is अनुस्वार at the time of application.

Declension of गो + अच् (च्-न-2)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | शकृत्/शकृद् | शकृती | शकृन्ति |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | शकृता | शकृद्भ्याम् | शकृद्भिः |
| 4 | शकृते | same as above | शकृद्भ्यः |
| 5 | शकृतः | same as above | same as above |
| 6 | same as above | शकृतोः | शकृताम् |
| 7 | शकृति | same as above | शकृत्सु |

## त-कारान्त-नपुंसकलिङ्गः (2) ददत्

ददत् (one who is giving)

डुदाञ् (3U) to give

दा + लट् 3.2.123 वर्तमाने लट् ।

दा + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

दा + शप् + अत् 3.1.68 कर्तरि शप् । ~ सार्वधातुके

दा + अत् 2.4.75 जुहोत्यादिभ्यः श्लुः । ~ शपः

दा दा + अत् 6.1.10 श्लौ । ~ प्रथमस्य द्वे

द दा + अत् 7.4.59 ह्रस्वः । ~ अभ्यासस्य

द द् + अत् 6.4.112 श्नाभ्यस्तयोरातः । ~ लोपः सार्वधातुके क्ङिति

ददत्

[LSK] ददत् $^{1/1}$ ॥

ददत् + सुँ

ददत् 7.1.23 स्वमोर्नपुंसकात्। ~ लुक्

ददद् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

ददत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

ददत् + औ $^{1/2}$

ददत् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

ददती

ददत् + जस्

ददत् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

ऋँ of शतृँ is इत्. Being उगित्, 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः। is प्राप्त, but negated by 7.1.78 नाभ्यस्ताच्छतुः । ~ नुम्. Then the next sūtra gives optional नुम् for नपुंसक.

## [विधिसूत्रम्] 7.1.79 वा नपुंसकस्य । ~ अभ्यासात् शतुः अङ्गस्य नुम् सर्वनामस्थाने

नुम् is optional for अङ्ग which is नपुंसकलिङ्ग ending with शतृ after अभ्यस्त when सर्वनामस्थान follows.




वा $^{0}$ नपुंसकस्य $^{6/1}$ । ~ अभ्यस्तात् $^{5/1}$ शतुः $^{6/1}$ अङ्गस्य $^{6/1}$ नुम् $^{1/1}$ सर्वनामस्थाने $^{7/1}$

2 words in the सूत्र; 5 words as अनुवृत्ति

- वा 0 – नुम् is optional.
- नपुंसकस्य 6/1 – Neuter; in स्थानेयोगा षष्ठी.
- अभ्यस्तात् 5/1 – From 7.1.78 नाभ्यस्ताच्छतुः।; in पूर्वपञ्चमी.
- शतुः 6/1 – From 7.1.78 नाभ्यस्ताच्छतुः।; with तदन्तविधि, this is understood as "शत्रन्त-नपुंसकस्य".
- अङ्गस्य 6/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य ।; this is qualified by नपुंसकस्य.
- नुम् 1/1 – From 7.1.58 इदितो नुम् धातोः।; this is आगम.

[LSK] अभ्यस्तात् $^{5/1}$ परः $^{1/1}$ यः $^{1/1}$ शता $^{1/1}$ तदन्तस्य $^{6/1}$ क्लीबस्य $^{6/1}$ वा $^{0}$ नुम् $^{1/1}$ सर्वनामस्थाने $^{7/1}$ ।

नुम्-आगम optionally takes place for neuter अङ्ग which ends with शतृँ after अभ्यस्त, when सर्वनामस्थान follows.

[LSK] ददन्ति $^{1/3}$, ददति $^{1/3}$ ॥

ददत् + जस्

ददत् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

दद न् त् + इ 7.1.79 वा नपुंसकस्य । ~ अभ्यस्तात् शतुः सर्वनामस्थने नुम्

ददंत् + इ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

ददन्त् + इ 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

<u>ददन्ति</u>

नमु-अभाव-पक्षे

ददति

## Declension of तुदत् (त्-न-2)

### शत्रन्त after अभ्यस्त

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | ददत्/ददद् 7.1.23, 8.2.39, 8.4.56 | ददती 7.1.19 | ददन्ति/ददति 7.1.20, 7.1.79, 8.3.24, 8.4.58 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | ददता | ददद्भ्याम् | ददद्भिः |
| 4 | ददते | same as above | ददद्भ्यः |
| 5 | ददतः | same as above | same as above |
| 6 | same as above | ददतोः | ददताम् |
| 7 | ददति | same as above | ददत्सु |

## त-कारान्त-नपुंसकलिङ्गः (3) तुदत्

तुदत् (one who is pushing) is a शतृ-अन्त-नपुंसक word with 6th conjugation (श-गणविकरण)

तुदँ (6U) to push

तुद् + लट् 3.2.123 वर्तमाने लट् ।

तुद् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

तुद् + श + अत् 3.1.77 तुदादिभ्यः शः । ~ सार्वधातुके कर्तरि

तुद् + अत् 6.1.79 अतो गुणे । ~ पररूपम्

तुदत् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] तुदत् ॥

तुदत् + सुँ

तुदत् 7.1.23 स्वमोर्नपुंसकात्। ~ लुक्

तुदद् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

तुदत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

तुदत् + औ $^{1/2}$

तुदत् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

The next sūtra is required.

## [विधिसूत्रम्] 7.1.80 आच्छीनद्योर्नुम् । ~ अङ्गात् शतुः अङ्गस्य वा

नुम्-आगम is optional for अङ्ग which ends with a part of शतृ which is after अङ्ग ending with अ, when शी or नदी follows.




आत् $^{5/1}$ शीनद्योः $^{7/2}$ नुम् $^{1/1}$ । ~ अङ्गात् $^{5/1}$ शतुः $^{6/1}$ अङ्गस्य $^{6/1}$ वा $^{0}$

3 words in the सूत्र; 4 words as अनुवृत्ति

- आत् 5/1 – प्रातिपदिक is अ; in पूर्वपञ्चमी.
- शीनद्योः 7/2 – प्रातिपदिक is शी-नदी; शी च नदी च शीनद्यौ (ID), तयोः।; in परसप्तमी.
- नुम् 1/1 – This is आगम.
- वा 0 – नुम् is optional.
- अङ्गात् 5/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य ।; विभक्तिपरिणाम with आत् in परसप्तमी.
- शतुः 6/1 – From 7.1.78 नाभ्यस्ताच्छतुः।; with तदन्तविधि, this is understood as "शत्रन्त-अङ्गस्य".
- अङ्गस्य 6/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य ।.

[LSK] अवर्ण-अन्तात् $^{5/1}$ अङ्गात् $^{5/1}$ परः $^{1/1}$ यः $^{1/1}$ शतुः $^{6/1}$ अवयवः $^{1/1}$ तदन्तस्य $^{6/1}$ नुम् $^{1/1}$ वा $^{0}$ शीनद्योः $^{7/2}$ ।

नुम्-आगम optionally takes place for अङ्ग ending with a part of शतृँ after अवर्ण-अन्त-अङ्ग, when शी or नदी follows.

[LSK] तुदन्ती $^{1/2}$, तुदती $^{1/2}$ ।

तुदत् + औ

| | |
|---|---|
| तुदत् + शी | 7.1.19 नपुंसकाच्च । ~ औङः शी |
| तुद न् त् + ई | 7.1.80 आच्छीनद्योर्नुम् । ~ अङ्गात् शतुः अङ्गस्य वा |
| तुदंत् + ई | 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः |
| तुदन्त् + ई | 8.4.58 अनुस्वारस्य ययि परसवर्णः । |

<u>तुदन्ती</u>

नमु-अभाव-पक्षे <u>तुदती</u>

[LSK] तुदन्ति[1/3] ॥

तुदत् + जस्

तुदत् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

तुद न् त् + इ 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः।

तुदंत् + इ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

तुदन्त् + इ 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

Declension of तुदत् (त्-न-3)

शत्रन्त after अवर्ण other than शप् or श्यन्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | तुदत्/तुदद् 7.1.23, 8.2.39, 8.4.56 | तुदन्ती/तुदती 7.1.19, 7.1.80, 8.3.24, 8.4.58 | तुदन्ति 7.1.20, 7.1.70, 8.3.24, 8.4.58 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | तुदता | तुदद्भ्याम् | तुदद्भिः |
| 4 | तुदते | same as above | तुदद्भ्यः |
| 5 | तुदतः | same as above | same as above |
| 6 | same as above | तुदतोः | तुदताम् |
| 7 | तुदति | same as above | तुदत्सु |

## त-कारान्त-नपुंसकलिङ्गः (4) पचत्

पचत् (one who is cooking) is a शतृ-अन्त-नपुंसक word with 1st conjugation (शप्-गणविकरण)

डुपचष् (1U) to cook

पच् + लट् 3.2.123 वर्तमाने लट् ।

पच् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

पच् + श + अत् 3.1.68 कर्तरि शप् । ~ सार्वधातुके

पच् + अत् 6.1.79 अतो गुणे । ~ पररूपम्

पचत् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

पचत् + सुँ

पचत् 7.1.23 स्वमोर्नपुंसकात्। ~ लुक्

पचद् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

पचत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

पचत् + औ 1/2

पचत् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

The next sūtra is required.

## [विधिसूत्रम्] 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शतुः अङ्गस्य नुम् शीनद्योः

नुम् is compulsory for अङ्ग which ends with a part of शतृ which is after शप् or श्यन् ending with अ, when शी or नदी follows.




शप्श्यनोः $^{6/2}$ नित्यम् $^{2/1}$ । ~ आत् $^{5/1}$ शतुः $^{6/1}$ अङ्गस्य $^{6/1}$ नुम् $^{1/1}$ शीनद्योः $^{7/2}$

2 words in the सूत्र; 4 words as अनुवृत्ति

- शप्श्यनोः 6/2 – प्रातिपदिक is शप्-श्यन्; शप् च श्यन् च शप्श्यनौ (ID), तयोः।; in परसप्तमी.
- नित्यम् 2/1 – Compulsory. Since the नुम् in the previous sūtra was optional, this is for clarification.
- आत् 5/1 – From 7.1.80 आच्छीनद्योर्नुम् ।; in पूर्वपञ्चमी.
- शतुः 6/1 – From 7.1.78 नाभ्यस्ताच्छतुः।; with तदन्तविधि, this is understood as “शत्रन्त-अङ्गस्य”.
- अङ्गस्य 6/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य ।.
- नुम् 1/1 – From 7.1.78 नाभ्यस्ताच्छतुः।; this is आगम.
- शीनद्योः 7/2 – From 7.1.80 आच्छीनद्योर्नुम् ।; in परसप्तमी.

[LSK] शप्श्यनोः $^{6/2}$ आत् $^{5/1}$ परः $^{1/1}$ यः $^{1/1}$ शतुः $^{6/1}$ अवयवः $^{1/1}$ तदन्तस्य $^{6/1}$ नित्यम् $^{2/1}$ नुम् $^{1/1}$ शीनद्योः $^{7/2}$ ।

नुम्-आगम compulsorily takes place for अङ्ग ending with शतृँ after the अ of शप् or श्यन्, when शी or नदी follows.

[LSK] पचन्ती $^{1/2}$ ।

पचत् + औ

| | |
|---|---|
| पचत् + शी | 7.1.19 नपुंसकाच्च । ~ औङः शी |
| पच न् त् + ई | 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शतुः अङ्गस्य नुम् शीनद्योः |
| पचंत् + ई | 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः |
| पचन्त् + ई | 8.4.58 अनुस्वारस्य ययि परसवर्णः । |

पचन्ती

[LSK] पचन्ति [1/3] ॥

पचत् + जस्

पचत् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

पच न् त् + इ 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः।

तुदंत् + इ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

पचन्त् + इ 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

Declension of पचत् (त्-न-4)

शत्रन्त with शप्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | पचत्/पचद् 7.1.23, 8.2.39, 8.4.56 | पचन्ती 7.1.19, 7.1.80, 8.3.24, 8.4.58 | पचन्ति 7.1.20, 7.1.70, 8.3.24, 8.4.58 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | पचता | पचद्भ्याम् | पचद्भिः |
| 4 | पचते | same as above | पचद्भ्यः |
| 5 | पचतः | same as above | same as above |
| 6 | same as above | पचतोः | पचताम् |
| 7 | पचति | same as above | पचत्सु |

## त-कारान्त-नपुंसकलिङ्गः (5) दीव्यत्

दीव्यत् (one who is playing) is a शतृ-अन्त-नपुंसक word with 4th conjugation, whose गणविकरण (additional suffix to conjugational suffix which comes after धातु) is श्यन्.

दिवुँ (4A) to play, etc.

दिव् + लट् 3.2.123 वर्तमाने लट् ।

दिव् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

दिव् + श्यन् + अत् 3.1.68 कर्तरि शप् । ~ सार्वधातुके

दिव् + यत् 6.1.79 अतो गुणे । ~ पररूपम्

दीव् + यत् 8.2.76 र्वोरुपधाया दीर्घ इकः । ~ धोतोः

दीव्यत् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] दीव्यत्$^{1/1}$ ।

दीव्यत् + सुँ

दीव्यत् 7.1.23 स्वमोर्नपुंसकात्। ~ लुक्

दीव्यद् 8.2.39 झलां जशोऽन्ते । ~ पदस्य

दीव्यत् 8.4.56 वाऽवसाने । ~ झलाम् चर्

[LSK] दीव्यन्ती$^{1/2}$ ।

दीव्यत् + औ

दीव्यत् + शी 7.1.19 नपुंसकाच्च । ~ औङः शी

दीव्य न् त् + ई 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शतुः अङ्गस्य नुम् शीनद्योः

पचंत् + ई 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

दीव्यन्त् + ई 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

दीव्यन्ती

[LSK] दीव्यन्ति$^{1/3}$ ॥

दीव्यत् + जस्

दीव्यत् + शि 7.1.20 जश्शसोः शि । ~ नपुंसकात्

दीव्य न् त् + इ 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः।

तुदंत् + इ 8.3.24 नश्चापदान्तस्य झलि । ~ अनुस्वारः

दीव्यन्त् + इ 8.4.58 अनुस्वारस्य ययि परसवर्णः ।

दीव्यन्ति

Declension of दीव्यत् (त्-न-5)

शत्रन्त with श्यन्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | दीव्यत्/दीव्यद् 7.1.23, 8.2.39, 8.4.56 | दीव्यन्ती 7.1.19, 7.1.80, 8.3.24, 8.4.58 | दीव्यन्ति 7.1.20, 7.1.70, 8.3.24, 8.4.58 |
| S | same as above | same as above | same as above |
| 2 | same as above | same as above | same as above |
| 3 | दीव्यता | दीव्यद्भ्याम् | दीव्यद्भिः |
| 4 | दीव्यते | same as above | दीव्यद्भ्यः |
| 5 | दीव्यतः | same as above | same as above |
| 6 | same as above | दीव्यतोः | दीव्यताम् |
| 7 | दीव्यति | same as above | दीव्यत्सु |

## Summary of declension of शत्रन्त for all लिङ्गs

Four types of declension:

धातुs can be divided into four according to how शतृँ-ending प्रातिपदिकs decline.

There are two areas in declension chart where the differences are made. One area is where सर्वनामस्थान follows, and the other area is where शी or नदी (ङीप्) follows.

| | अङ्ग for शतृँ (गण of धातु) | In सर्वनामस्थान | In शी and नदी |
|---|---|---|---|
| A | अभ्यस्त<br>(3rd, धातु termed अभ्यस्त by 6.1.5 and 6.1.6) | Optional नुम् in neuter<br>7.1.79 वा नपुंसकस्य ।<br>No नुम् in other genders<br>7.1.78 नाभ्यस्ताच्छतुः। | No नुम् |
| B | अङ्ग for शतृँ, ending with अवर्ण<br>(आदन्त 2rd, 6th, "स्य"-ending in लृट्) | नुम्<br>7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।/<br>7.1.72 नपुंसकस्य झलचः । | Optional नुम्<br>7.1.80 आच्छीनद्योर्नुम् । |
| C | अङ्ग ending with अवर्ण of शप्/श्यन्<br>(1st, 4th, सनाद्यन्त (णिच्, सन्, etc.)<br>This is अपवाद to B. | नुम्<br>7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।/<br>7.1.72 नपुंसकस्य झलचः । | नित्यम् नुम्<br>7.1.81 शप्श्यनोर्नित्यम् । |
| D | The rest<br>(2nd, 5th, 7th, 8th, 9th) | नुम्<br>7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।/<br>7.1.72 नपुंसकस्य झलचः । | No नुम् |

| गण | गणविकरण-प्रत्ययः | अवर्णान्त-अङ्ग for शतृँ? | Note |
|---|---|---|---|
| 1st | शप् (अ) | Yes | |
| 2nd | शप् (अ) | No | शप् is elided by लुक्. |
| | | Yes | When धातु ends with आ |
| 3rd | शप् (अ) | No | शप् is elided by श्लु, which causes द्वित्व. The reduplicated धातु gains अभ्यस्त-संज्ञा.<br>आ at the end of अभ्यस्त is elided by 6.4.112 श्नाभ्यस्तयोरातः । |
| 4th | श्यन् (य) | Yes | |
| 5th | श्नु (नु) | No | |
| 6th | श (अ) | Yes | |
| 7th | श्नम् (न) | No | श्नम् is आगम, whose content is न. However, there is no धातु in 7th गण which ends with vowel. Thus, there is no possibility to have अवर्ण-ending अङ्ग. |
| 8th | उ (उ) | No | |
| 9th | श्ना (ना) | No | आ of श्ना is elided by 6.4.112 श्नाभ्यस्तयोरातः । |
| 10th | णिच् + शप् (अय) | Yes | |
| लृट्-लकार | स्य (स्य) | Yes | |
| अभ्यस्त | | | Any reduplicated धातु and जक्षात्यादिगण. |
| सनाद्यन्त | + शप् | Yes | |

Group A: 3rd **गण**

**Declension of शतृँ-ending with धातु in 3rd गण**

In neuter **सर्वनामस्थान**, optional **नुम्** by 7.1.79 **वा नपुंसकस्य । ~ नुम्**

In everywhere else, no **नुम्** by 7.1.78 **नाभ्यस्ताच्छतुः। ~ नुम्**

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | ददन् | ददतौ | ददतः | ददती | ददत्यौ | ददत्यः | ददत् | ददती | ददति/ ददन्ति |
| S | s.a. | s.a. | s.a. | ददति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | ददतम् | s.a. | ददतः | ददतीम् | s.a. | ददतीः | s.a. | s.a. | s.a. |
| 3 | ददता | ददद्भ्याम् | ददद्भिः | ददत्या | ददतीभ्याम् | ददतीभिः | same as for masculine | | |
| 4 | ददते | s.a. | ददद्भ्यः | ददत्यै | s.a. | ददतीभ्यः | | | |
| 5 | ददतः | s.a. | s.a. | ददत्याः | s.a. | s.a. | | | |
| 6 | s.a. | ददतोः | ददताम् | s.a. | ददत्योः | ददतीनाम् | | | |
| 7 | ददति | s.a. | ददत्सु | ददत्याम् | s.a. | ददतीषु | | | |

डुदाञ् (3U) to give

दा + लट् 3.2.123 वर्तमाने लट् ।

दा + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

दा + शप् + अत् 3.1.68 कर्तरि शप् । ~ सार्वधातुके

दा + अत् 2.4.75 जुहोत्यादिभ्यः श्लुः । ~ शपः

दा दा + अत् 6.1.10 श्लौ । ~ प्रथमस्य द्वे

द दा + अत् 7.4.59 ह्रस्वः । ~ अभ्यासस्य

द द् + अत् 6.4.112 श्नाभ्यस्तयोरातः । ~ लोपः सार्वधातुके क्ङिति

ददत्

The अङ्ग for शतृँ is दद्, which is termed अभ्यस्त by 6.1.5 उभे अभ्यस्तम् ।.

Group B: आदन्त 2rd, 6th गण, लृट्-आदेश

## Declension of शतृँ-ending with आदन्त-धातु in 2nd गण

In सर्वनामस्थान, नुम् by 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।

In नदी and शी, optional नुम् by 7.1.80 आच्छीनद्योर्नुम् ।

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | यान् | यान्तौ | यान्तः | यान्ती/ याती | यान्त्यौ/ यात्यौ | यान्त्यः/ यात्यः | यात् | याती/ यान्ती | यान्ति |
| S | s.a. | s.a. | s.a. | यान्ति/ याति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | यान्तम् | s.a. | यातः | यान्तीम्/ यातीम् | s.a. | यान्तीः/ यातीः | s.a. | s.a. | s.a. |
| 3 | याता | याद्भ्याम् | याद्भिः | यान्त्या/ यात्या | यान्तीभ्याम्/ यातीभ्याम् | यान्तीभिः/ यातीभिः | same as for masculine | | |
| 4 | याते | s.a. | याद्भ्यः | यान्त्यै/ यात्यै | s.a. | यान्तीभ्यः/ यातीभ्यः | | | |
| 5 | यातः | s.a. | s.a. | यान्त्याः/ यात्याः | s.a. | s.a. | | | |
| 6 | s.a. | यातोः | याताम् | s.a. | यान्त्योः/ यात्योः | यान्तीनाम्/ यातीनाम् | | | |
| 7 | याति | s.a. | यात्सु | यान्त्याम्/ यात्याम् | s.a. | यान्तीषु/ यातीषु | | | |

या प्रापणे (2P) to go

या + लट् 3.2.123 वर्तमाने लट् ।

या + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

या + शप् + अत् 3.1.68 कर्तरि शप् । ~ सार्वधातुके

या + अत् 2.4.72 अदिप्रभृतिभ्यः शपः । ~ लुक्

यात् 6.1.101 अकः सवर्णे दीर्घः । ~ एकः पूर्वपरयोः संहितायाम्

The अङ्ग for शतृँ is या, which is अवर्ण-अन्त. The अवर्ण is not of शप् or श्यन्.

**Declension of शतृँ-ending with आदन्त-धातु in 6th गण**

In **सर्वनामस्थान**, **नुम्** by 7.1.70 **उगिदचां सर्वनामस्थानेऽधातोः ।**

In **नदी** and **शी**, optional **नुम्** by 7.1.80 **आच्छीनद्योर्नुम् ।**

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | तुदन् | तुदन्तौ | तुदन्तः | तुदन्ती/ तुदती | तुदन्त्यौ/ तुदत्यौ | तुदन्त्यः/ तुदत्यः | तुदत् | तुदती/ तुदन्ती | तुदन्ति |
| S | s.a. | s.a. | s.a. | तुदन्ति/ तुदति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | तुदन्तम् | s.a. | तुदतः | तुदन्तीम्/ तुदतीम् | s.a. | तुदन्तीः/ तुदतीः | s.a. | s.a. | s.a. |
| 3 | तुदता | तुदद्भ्याम् | तुदद्भिः | तुदन्त्या/ तुदत्या | तुदन्तीभ्याम् / तुदतीभ्याम् | तुदन्तीभिः/ तुदतीभिः | same as for masculine | | |
| 4 | तुदते | s.a. | तुदद्भ्यः | तुदन्त्यै/ तुदत्यै | s.a. | तुदन्तीभ्यः/ तुदतीभ्यः | | | |
| 5 | तुदतः | s.a. | s.a. | तुदन्त्याः/ तुदत्याः | s.a. | s.a. | | | |
| 6 | s.a. | तुदतोः | तुदताम् | s.a. | तुदन्त्योः/ तुदत्योः | तुदन्तीनाम्/ तुदतीनाम् | | | |
| 7 | तुदति | s.a. | तुदत्सु | तुदन्त्याम्/ तुदत्याम् | s.a. | तुदन्तीषु/ तुदतीषु | | | |

तुदँ (6U) to push

तुद् + लट् 3.2.123 वर्तमाने लट् ।

तुद् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

तुद् + श + अत् 3.1.77 तुदादिभ्यः शः । ~ सार्वधातुके कर्तरि

तुद् + अत् 6.1.79 अतो गुणे । ~ पररूपम्

तुदत् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

The अङ्ग for शतृँ is तुद, which is अवर्ण-अन्त. The अवर्ण is not of शप् or श्यन्.

## Declension of शतृँ-ending of लृट्

In **सर्वनामस्थान**, **नुम्** by 7.1.70 **उगिदचां सर्वनामस्थानेऽधातोः ।**

In **नदी** and **शी**, optional **नुम्** by 7.1.80 **आच्छीनद्योर्नुम् ।**

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | नेष्यन् | नेष्यन्तौ | नेष्यन्तः | नेष्यन्ती/ नेष्यती | नेष्यन्त्यौ/ नेष्यत्यौ | नेष्यन्त्यः/ नेष्यत्यः | नेष्यत् | नेष्यती/ नेष्यन्ती | नेष्यन्ति |
| S | s.a. | s.a. | s.a. | नेष्यन्ति/ नेष्यति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | नेष्यन्तम् | s.a. | नेष्यतः | नेष्यन्तीम्/ नेष्यतीम् | s.a. | नेष्यन्तीः/ नेष्यतीः | s.a. | s.a. | s.a. |
| 3 | नेष्यता | नेष्यद्भ्याम् | नेष्यद्भिः | नेष्यन्त्या/ नेष्यत्या | नेष्यन्तीभ्याम्/ नेष्यतीभ्याम् | नेष्यन्तीभिः/ नेष्यतीभिः | same as for masculine | | |
| 4 | नेष्यते | s.a. | नेष्यद्भ्यः | नेष्यन्त्यै/ नेष्यत्यै | s.a. | नेष्यन्तीभ्यः/ नेष्यतीभ्यः | | | |
| 5 | नेष्यतः | s.a. | s.a. | नेष्यन्त्याः/ नेष्यत्याः | s.a. | s.a. | | | |
| 6 | s.a. | नेष्यतोः | नेष्यताम् | s.a. | नेष्यन्त्योः/ नेष्यत्योः | नेष्यन्तीनाम्/ नेष्यतीनाम् | | | |
| 7 | नेष्यति | s.a. | नेष्यत्सु | नेष्यन्त्याम्/ नेष्यत्याम् | s.a. | नेष्यन्तीषु/ नेष्यतीषु | | | |

णी प्रापणे (1U) to lead

नी 6.1.65 णो नः । ~ धात्वादेः

नी + लृट् 3.2.13 लृट् शेषे च । ~ भविष्यति

नी + शतृँ 3.3.14 लृटः सद्वा ।

नी + स्य + अत् 3.1.33 स्यतासी लृलुटोः ।

ने + स्य + अत् 7.3.84 सार्वधातुकार्धधातुकयोः । ~ गुणः

ने + स्यत् 6.1.79 अतो गुणे । ~ पररूपम्

ने + ष्यत् 8.3.59 आदेशप्रत्यययोः ।

नेष्यत् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

The अङ्ग for शतृँ is नेष्य, which is अवर्ण-अन्त. The अवर्ण is not of शप् or श्यन्.

Group C: 1st, 4th गण, सनाद्यन्तधातु

## Declension of शतृँ-ending with धातु in 1st गण

In सर्वनामस्थान, नुम् by 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।

In नदी and शी, नुम् by 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शीनद्योः नुम्

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | पचन् | पचन्तौ | पचन्तः | पचन्ती | पचन्त्यौ | पचन्त्यः | पचत् | पचन्ती | पचन्ति |
| S | s.a. | s.a. | s.a. | पचन्ति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | पचन्तम् | s.a. | पचतः | पचन्तीम् | s.a. | पचन्तीः | s.a. | s.a. | s.a. |
| 3 | पचता | पचद्भ्याम् | पचद्भिः | पचन्त्या | पचन्तीभ्याम् | पचन्तीभिः | same as for masculine | | |
| 4 | पचते | s.a. | पचद्भ्यः | पचन्त्यै | s.a. | पचन्तीभ्यः | | | |
| 5 | पचतः | s.a. | s.a. | पचन्त्याः | s.a. | s.a. | | | |
| 6 | s.a. | पचतोः | पचताम् | s.a. | पचन्त्योः | पचन्तीनाम् | | | |
| 7 | पचति | s.a. | पचत्सु | पचन्त्याम् | s.a. | पचन्तीषु | | | |

डुपँचष् पाके (1U) to cook

पच् + लट् 3.2.123 वर्तमाने लट् ।

पच् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

पच् + शप् + अत् 3.1.68 कर्तरि शप्। ~ सार्वधातुके

पच् + अत् 6.1.79 अतो गुणे । ~ पररूपम्

पचत् 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

The अङ्ग for शतृँ is पच, which is अवर्ण-अन्त. Since this अवर्ण is of शप् or श्यन्, 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शीनद्योः नुम् is appied.

सनाद्यन्त-धातुs (णिच्-ending such as धातुs in 10th गण and causative धातु, सन्, etc.) are suffixed with शप् when शतृ follows. Thus they are treated in the same manner as धातुs in 1st गण.

## Declension of शतृँ-ending with धातु in 4th गण

In सर्वनामस्थान, नुम् by 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।

In नदी and शी, नुम् by 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शीनद्योः नुम्

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | दीव्यन् | दीव्यन्तौ | दीव्यन्तः | दीव्यन्ती | दीव्यन्त्यौ | दीव्यन्त्यः | दीव्यत् | दीव्यन्ती | दीव्यन्ति |
| S | s.a. | s.a. | s.a. | दीव्यन्ति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | दीव्यन्तम् | s.a. | दीव्यतः | दीव्यन्तीम् | s.a. | दीव्यन्तीः | s.a. | s.a. | s.a. |
| 3 | दीव्यता | दीव्यद्भ्याम् | दीव्यद्भिः | दीव्यन्त्या | दीव्यन्तीभ्याम् | दीव्यन्तीभिः | same as for masculine | | |
| 4 | दीव्यते | s.a. | दीव्यद्भ्यः | दीव्यन्त्यै | s.a. | दीव्यन्तीभ्यः | | | |
| 5 | दीव्यतः | s.a. | s.a. | दीव्यन्त्याः | s.a. | s.a. | | | |
| 6 | s.a. | दीव्यतोः | दीव्यताम् | s.a. | दीव्यन्त्योः | दीव्यन्तीनाम् | | | |
| 7 | दीव्यति | s.a. | दीव्यत्सु | दीव्यन्त्याम् | s.a. | दीव्यन्तीषु | | | |

दिवुँ क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु (4P) to play, etc.

| | |
|---|---|
| दिव् + लट् | 3.2.123 वर्तमाने लट् । |
| दिव् + शतृँ | 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे । |
| दिव् + श्यन् + अत् | 3.1.69 दिवादिभ्यः श्यन् । ~ सार्वधातुके कर्तरि |
| दिव् + यत् | 6.1.79 अतो गुणे । ~ पररूपम् |
| दीव् + यत् | 8.2.77 हलि च । ~ धातोः र्वोः उपधायाः दीर्घः इकः |
| दीव्यत् | 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम् |

The अङ्ग for शतृँ is दीव, which is अवर्ण-अन्त. Since this अवर्ण is of शप् or श्यन्, 7.1.81 शप्श्यनोर्नित्यम् । ~ आत् शीनद्योः नुम् is appied.

Group D: 2nd, 5th, 7th, 8th, 9th गण

## Declension of शतृँ-ending with धातु in 2nd गण

In सर्वनामस्थान, नुम् by 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।

In नदी and शी, no नुम्

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | अदन् | अदन्तौ | अदन्तः | अदती | अदत्यौ | अदत्यः | अदत् | अदती | अदन्ति [22] |
| S | s.a. | s.a. | s.a. | अदति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | अदन्तम् | s.a. | अदतः | अदतीम् | s.a. | अदतीः | s.a. | s.a. | s.a. |
| 3 | अदता | अदद्भ्याम् | अदद्भिः | अदत्या | अदतीभ्याम् | अदतीभिः | same as for masculine | | |
| 4 | अदते | s.a. | अदद्भ्यः | अदत्यै | s.a. | अदतीभ्यः | | | |
| 5 | अदतः | s.a. | s.a. | अदत्याः | s.a. | s.a. | | | |
| 6 | s.a. | अदतोः | अदताम् | s.a. | अदत्योः | अदतीनाम् | | | |
| 7 | अदति | s.a. | अदत्सु | अदत्याम् | s.a. | अदतीषु | | | |

अदँ भक्षणे (2P) to eat

अद् + लट् 3.2.123 वर्तमाने लट् ।

अद् + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

अद् + शप् + अत् 3.1.68 कर्तरि शप् । ~ सार्वधातुके

अद् + अत् 2.4.72 अदिप्रभृतिभ्यः शपः । ~ लुक्

अदत्

The अङ्ग for शतृँ is अद्, which is not अवर्ण-अन्त. Thus there is no occasion for नुम् with शी and नदी by 7.1.80 आच्छीनद्योर्नुम् । and 7.1.81 शप्श्यनोर्नित्यम् ।.

[22] The word "प्रयन्ति" in the first anuvāka of भृगु-वल्ली of तैत्तिरीयोपनिषद् is a noun made of प्रातिपदिक प्रयत् in neuter with 1/3 ending. प्र is the उपसर्ग; इण् गतौ (2P to go) is the धातु, शतृ is the कृत्-प्रत्यय. इ + अत् = यत् with 6.4.81 इणो यण्।.

## Declension of शतृँ-ending with धातु in 5th गण

In सर्वनामस्थान, नुम् by 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।

In नदी and शी, no नुम्

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | सुन्वन् | सुन्वन्तौ | सुन्वन्तः | सुन्वती | सुन्वत्यौ | सुन्वत्यः | सुन्वत् | सुन्वती | सुन्वन्ति |
| S | s.a. | s.a. | s.a. | सुन्वति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | सुन्वन्तम् | s.a. | सुन्वतः | सुन्वतीम् | s.a. | सुन्वतीः | s.a. | s.a. | s.a. |
| 3 | सुन्वता | सुन्वद्भ्याम् | सुन्वद्भिः | सुन्वत्या | सुन्वतीभ्याम् | सुन्वतीभिः | same as for masculine | | |
| 4 | सुन्वते | s.a. | सुन्वद्भ्यः | सुन्वत्यै | s.a. | सुन्वतीभ्यः | | | |
| 5 | सुन्वतः | s.a. | s.a. | सुन्वत्याः | s.a. | s.a. | | | |
| 6 | s.a. | सुन्वतोः | सुन्वताम् | s.a. | सुन्वत्योः | सुन्वतीनाम् | | | |
| 7 | सुन्वति | s.a. | सुन्वत्सु | सुन्वत्याम् | s.a. | सुन्वतीषु | | | |

षुञ् अभिषवे (5U) to press

सु 6.1.64 धात्वादेः षः सः ।

सु + लट् 3.2.123 वर्तमाने लट् ।

सु + शतृँ 3.2.124 लटः शतृशानचावप्रथमासमानाधिकरणे ।

सु + श्नु + अत् 3.1.73 स्वादिभ्यः श्नुः । ~ सार्वधातुके कर्तरि

सु + न्व् + अत् 6.4.87 हुश्नुवोः सार्वधातुके । ~ अचि यण्

सुन्वत्

The अङ्ग for शतृँ is सुन्व्, which is not अवर्ण-अन्त. Thus there is no occasion for नुम् with शी and नदी by 7.1.80 आच्छीनद्योर्नुम् । and 7.1.81 शप्श्यनोर्नित्यम् ।.

## Declension of शतृँ-ending with धातु in 7th गण

In सर्वनामस्थान, नुम् by 7.1.70 उगिदचां सर्वनामस्थानेऽधातोः ।

In नदी and शी, no नुम्

| | 1 | 2 | 3 | 1 | 2 | 3 | 1 | 2 | 3 |
|---|---|---|---|---|---|---|---|---|---|
| 1 | रुन्धन् | रुन्धन्तौ | रुन्धन्तः | रुन्धती | रुन्धत्यौ | रुन्धत्यः | रुन्धत् | रुन्धती | रुन्धन्ति |
| S | s.a. | s.a. | s.a. | रुन्धति | s.a. | s.a. | s.a. | s.a. | s.a. |
| 2 | रुन्धन्तम् | s.a. | रुन्धतः | रुन्धतीम् | s.a. | रुन्धतीः | s.a. | s.a. | s.a. |
